Burnell's Catalogue No. 5816. Page 102. Right column. Substance—Paper. Size—6½ × 3 inches. Sheets— Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—35. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥ १ ॥

End:

नमो नमोऽशेषदोषहरपूर्णगुणात्मने ।
विरिञ्चः सर्वपूर्वाढ्यो वन्द्यो यः श्रीरमायते ॥ १० ॥

Colophon:

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्राणुभाष्ये श्रीमदानन्दतीर्थभगवत्पादविरचिते अणुवेदान्ते चतुर्थोऽध्यायः ।

श्रीकृष्णार्पणमस्तु । करकृतं + सन्तः

Subject. Aṇubhāṣya a metrical exposition by Ānandatīrtha of his own Brahmasūtrabhāṣya I-IV. Adhyāyas.

Remarks:—The Ms. is in good condition. This work is published not only in the Sarvanumūlam edited by T. R. Kṛṣṇācārya,

but an edition with grammatical analysis is brought out by Kṛṣṇācārya Paurāṇika of Hubli in 1905.

॥ अणुभाष्यम् ॥

7934. AṆUBHĀṢYAM.

Burnell's Catalogue No. 5815. Page 102. Right column. Substance—Paper. Size—4×2½ inches. Sheets—5. Lines—8-10 to a Page. Script—Devanāgarī. No. of Granthas—35. Author—Ānandatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7933.

Remarks:—The Ms. is in a good condition.

॥ अणुभाष्यम् ॥

7935. AṆUBHĀṢYAM.

Burnell's Catalogue No. 5751. Page 102. Right column. Substance—Paper. Size—12¾×4¾ inches. Sheets—2 (71-72). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—35. Author—Ānandatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7933.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रमाणलक्षणम् ॥

7936. PRAMĀṆALAKṢAṆAM.

Burnell's Catalogue No. 5893 a. Page 104. Right column. Substance—Paper. Size—$5\frac{1}{2} \times 2\frac{7}{8}$ inches. Sheets—8 (1-8 out of 35). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Ānandatīrtha. Complete. Printed.

Beginning:

अशेषगुरुमीशेशं नारायणमनामयम् ।
संप्रणम्य प्रवक्ष्यामि प्रमाणानां सलक्षणम् ॥

यथार्थं प्रमाणम् । तद्द्विविधम् । केवलमनुप्रमाणञ्च ।

End:

आनन्दतीर्थमुनिना ब्रह्मतर्कोक्तिमार्गतः ।
मानलक्षणमित्युक्तं संक्षेपाद्ब्रह्मसिद्धये ॥

अशेषमानमेयैकसाक्षिणे क्षयमूर्तये ।
अजेशपुरुहूतेड्य नमो नारायणाय ते ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं प्रमाणलक्षणं समाप्तम् ॥

॥ हरिः ॐ ॥

Subject: Pramāṇalakṣaṇa. A tract on principles of dualistic philosophy.

Remarks:—The Ms. is in good condition.

This is the first of a series of ten tracts written by Ānandatīrtha in defence of the various topics in the Dvaita system. The following are the names of all the ten tracts.

(1) Pramāṇalakṣaṇa.
(2) Kathālakṣaṇa.
(3) Upādhikhaṇḍana.
(4) Māyāvādakhaṇḍana.
(5) Tattvasaṅkhyāna.
(6) Tattvaviveka.
(7) Tattvodyota.
(8) Ṛgvedabrahmapañcikā.
(9) Karmanirṇaya.
(10) Viṣṇutattvanirṇaya

All the tracts are printed in a compact form by the Nirnayasagara press as a part of their Sarvamūlam edited by T. R. Kṛṣṇācārya. To all these tracts Jayatīrtha has written commentaries. All his commentaries have not been published but where some of these tracts have been published separately the commentary of Jayatīrtha is also appended. Jayatīrtha's commentaries with text are published for the following tracts,

(1) Tattvasaṅkhyāna.
(2) Tattvodyota.
(3) Prapañcamithyātvānumānakhaṇḍana.

PRAMĀṆALAKṢAṆAM.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7937	B. L.	5894	Paper.	8×4	2 (1-2)	12	Devanāgarī.	Complete.
7938	,,	5895	,,	$6\frac{3}{8} \times 9\frac{7}{8}$	4 (1-4)	12	,,	,,
7939	,,	5896	,,	$9\frac{1}{2} \times 8\frac{1}{2}$	3 (1-3)	9 or 10	,,	,,
7940	,,	5897 a	,,	$11\frac{1}{4} \times 4\frac{1}{2}$	3 (1-3)	10	,,	,,
7941	,,	5898	,,	$9\frac{1}{2} \times 4$	4	8	,,	,,
7942	,,	5900	,,	$9\frac{1}{2} \times 3$	3	8	,,	,,
7943	,,	6203	,,	$7\frac{1}{3} \times 2$	6	6	,,	,,
7944	,,	6230	,,	$8\frac{1}{2} \times 3\frac{1}{3}$	2 (1&2)	20-22	,,	,,
7945	,,	9843 d	Palm leaf.	$6 \times 1\frac{1}{4}$	3	6	Nandināgarī.	Incomplete.

॥ प्रमाणलक्षणव्याख्या—न्यायकल्पलता ॥

7946. PRAMĀṆALAKṢAṆAVYĀKHYĀ—NYĀYAKALPALATĀ.

Burnell's Catalogue No. 5901. Page 104. Right column. Substance—Paper. Size—9½ × 8½ inches. Sheets—50. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1450. Author—Jayatīrtha. Complete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

निर्विघ्नमस्तु ॥ ॐ ॥

अणकध्यागण्यकल्याणगुणाब्धिं पुरुषोत्तमम् ।

पूर्णबोधानपि गुरून् व्याकुर्वे मानलक्षणम् ॥ १ ॥

इह खलु सुखमेव मे स्याद्दुःखं मनागपि मा भूदिति निखिलापेक्षितस्य मोक्षस्येश्वरसाक्षात्कारमन्तरेणासंभवात्तस्य च प्रमाणानि विनाऽनुदयात् प्रमाणानाञ्च यथावद्विदितानामेव तद्धेतुत्वोपपत्तेस्तत्स्वरूपं यथावज्ज्ञापयितुकामो भगवानाचार्यः प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्यादिप्रयोजनविशिष्टशिष्टाचारपरंपराप्राप्तेष्टदेवतानतिपूर्वकं श्रीनृशेमुषीमनुकूलयिष्यन् वक्ष्यमाणमेवाग्रे दर्शयति ॥

अशेषगुरुमीशेशं नारायणमनामयम् ।

संप्रणम्य प्रवक्ष्यामि प्रमाणानां स्वलक्षणम् ॥

End:

अक्षयमूर्तये इति ॥ अवे(क्षयं)श्वरस्य शरीरम् । तत्र सच्चिदानन्दादिरूपत्वेनाक्षयमेवेति न कश्चिद्दोष इति । अजादिबहुत्वाच्च नारायणं एव नमस्कार्य इति भावेनो-क्तम् । अजेति ॥

अमरा भ्रमरायन्ते कमला वरटायते ।

सत्यदाम्भोरुहद्वन्द्वो वन्दे तं पुरुषोत्तमम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य प्रमाणलक्षणस्य टी-का न्यायकल्पलता जयतीर्थभिक्षुविरचिता समाप्ता ।

सुवर्णसंज्ञान्तर्गतकमलासनराजसः ।

दयां करोतु तिर्मिये तस्यामे न च केशवे ॥

आनन्दतीर्थमुनय आचार्याः स्वामिनः सदा ।

दयां कुर्वे.... .... ॥

श्रीवासुदेवार्पणमस्तु ॥ श्रीमदानन्दतीर्थभगवत्पादाचार्यार्पणमस्तु ॥

श्रीरस्तु शुभमस्तु ॥ ॥ ग्रन्थसंख्या. १४५० ॥

Subject: Pramāṇalakṣaṇavyākhyā Nyāyakalpalatā.

Remarks:—The Ms. is in good condition. This is the commentary of Jayatīrtha on the first of ten tracts.

PRAMĀṆALAKṢAṆAVYĀKHYĀ.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7947	B. L.	5302	Paper.	$9\frac{1}{2} \times 4$	71	8 or 9	Devanāgarī.	Complete.
7948	,,	5903	,,	$10\frac{1}{4} \times 4\frac{1}{4}$	23	16	,,	,,
7949	,,	5904	,,	$9\frac{1}{3} \times 4\frac{1}{4}$	25	13 or 14	,,	,,
7950	,,	5905	,,	$9\frac{1}{2} \times 6$	30	20	,,	,,
7951	,,	5906	,,	$12\frac{1}{2} \times 4\frac{3}{4}$	37	10	,,	Incomplete.
7952	,,	5907	,,	$9\frac{1}{8} \times 3\frac{1}{4}$	13	9	,,	,,
7953	,,	5908	,,	$9\frac{1}{3} \times 4\frac{1}{4}$	44	9	,,	,,

॥ न्यायकल्पलताव्याख्या—न्यायदीपः ॥

7954. NYĀYAKALPALATĀVYĀKHYĀ—NYĀYADĪPAḤ.

Burnell's Catalogue No. 5911. Page 104. Right column. Substance—Paper. Size—9¼×4 inches. Sheets—18. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Ananta. Incomplete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

नारायणमसंख्येयगुणैः पूर्णं रमापतिम् ।
ज्ञानानन्दतनुं वन्दे ब्रह्मवाय्वादिवन्दितम् ॥
व्यासं सर्वेष्टदं वन्दे जगज्जन्मादिकारणम् ।
ज्ञानवैराग्यभक्त्यादिपदं श्रीविट्ठलं विभुम् ॥ २ ॥
आनन्दतीर्थभगवत्पादपद्मे नमाम्यहम् ।
शिवादिभिर्देववरैर्वन्दिते परमप्रिये ॥ ३ ॥
वागीशमुखदेवेषु स्थित्वा ये प्राणनायकाः ।
सर्वाश्चेष्टाः कारयन्ति मध्वदेवान् नमामि तान् ॥ ४ ॥
पद्मनाभार्यप्रमुखान् विष्णुतीर्थान् यतीन्भजे ।
त्रिविक्रमार्यवर्याद्यान् मध्वीयान् ग्रहिणस्तथा ॥ ५ ॥
श्रीमज्जयमुनीन्द्राणां भजेऽहं पादपल्लवम् ।
एषां सच्छास्त्रमाश्रित्य जना(ःपूता) बभूविरे ॥ ६ ॥

येऽध्यापयन्ति निगमान्माध्वसिद्धान्तमादिशन् ।
नरसिंहार्यवर्यास्तान् भूयो भूयो नमाम्यहम् ॥ ७ ॥

एषा............च्छ्रुत्वा यतयो गृहिणस्तथा ।
व्याचख्युर्मध्वशास्त्रं हि नृसिंहार्यान्नमामि तान् ॥ ८ ॥

नृसिंहार्यदयाकल्पवृक्षश्रेष्ठसमाश्रयात् ।
न्यायकल्पलतागूढवाक्यार्थस्तु प्रकाश्यते ॥ ९ ॥

निखिलदेववरादिवन्दितचरणैः परमकृपालुभिः श्रीमदानन्दतीर्थभगवत्पादाचार्यवर्यैः क्षीरोदधितनये...... ...सर्वेषां भक्तजनानां निःश्रेयसं प्रमाणाप्रमाणविवेकेन भवतीति तदर्थं कृतप्रणामलक्षणाख्यं ग्रन्थमतिगभीरार्थं शिष्यकृपया व्याचिख्यासवः श्रीमज्जयतीर्थाचार्यवर्याः चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये प्रचयगमनाय च शिष्टाचारपरंपराप्राप्तं नारायणनतिरूपं मंगलं मनसि कृतं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन्त एव चिकी... प्रेक्षावत्प्रवृत्त्यर्थं चिकीर्षितं प्रतिजानीते । प्रणम्येति ॥

End :

अथ समापितप्रकरणोऽपि श्रीमज्जयतीर्थमुनिः स्वेष्टदेवताः प्रणमति । अमरा इति । यत्पदाम्भोरुहद्वन्द्वे यस्य पुरुषोत्तमस्य पादारविन्दद्वये अमरा देवाः भ्रमरायन्ते भ्रमरवदाचरन्ति । कमला रमादेवी वरभ्रयते । हंसीवदाचरति । तं पुरुषोत्तमं वन्दे । नौमि स्तौमि चेत्यर्थः ।

नरसिंहाख्यवर्याणामनन्ताख्येन सूनुना ।
कृतः सन्न्यायदीपोऽयं प्रीत्यै माधवमध्वयोः ॥

नारायणमजेशेन्द्रपूर्ववन्द्यं रमापतिम् ।
ज्ञानानन्दादिभिः पूर्णं गुणैर्वन्दे निरञ्जनम् ॥

शिवशेष....गुर्वादिनिखिलामरवन्दितम् ।
श्रीमदानन्दतीर्थाख्यं वन्देऽहं पृषतां पतिम् ॥

अखिलान्मध्वशिष्यांश्च श्रीमज्जयमुनीन् गुरून् ।
नरसिंहार्यवर्याणां भूयो भूयो नमाम्यहम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य प्रमाणलक्षणस्य विवरणं जयतीर्थमुनिविरचितं समाप्तम् । इदं पुस्तकं कौलगीनारायणेन लिखितम् ॥

Subject: Nyāyakalpalatāvyākhyā—Nyāyadīpa.

Remarks:—The Ms. is in good condition.

This is a commentary on Jayatīrtha's commentay of Pramāṇalakṣana by an unknown third author who calls himself the disciple of one Narasimha. He calls this commentary not only by the name Nyāyadīpa but also as Gūḍhavākyārtha.

॥ न्यायकल्पलताव्याख्या ॥

7955. NYĀYAKALPALATĀVYĀKHYĀ.

Burnell's Catalogue No. 5910. Page 104. Right column.

Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—17. Lines—16 or 17 to a Page. Script—Devanāgarī. No. of Granthas—900. Author— ?. Incomplete. Not Printed.

Beginning:

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ।

श्रीमदस्मद्गुरुभ्यो नमः । अविघ्नमस्तु ॥ ॐ ॥

वेदव्यासं श्रीमदाचार्यवर्यं

गुरुं जयार्यं व्यासतीर्थाभिधञ्च ।

विद्याधीशं पदवाक्यप्रमाण-

ज्ञान्युत्तमं सर्वदाहं प्रपद्ये ॥ १ ॥

श्रीमदानन्दोपपदाचार्यान् सद्गु गुणशालिनः ।

सर्वशास्त्रप्रवक्तॄंश्च वन्देऽहं धीविशुद्धये ॥ २ ॥

श्रीनिवासाभिधाचार्यान् सर्वशास्त्रविशारदान् ।

ज्ञानभक्त्यादिसंपन्नान् सर्वदापि नतोऽस्म्यहम् ॥ ३ ॥

विद्याधीशाख्ययत्युक्तमार्गेण तदनुग्रहात् ।

यथाबोधं व्याकरिष्ये मानलक्षणपञ्चिकाम् ॥ ४ ॥

मानलक्षणं व्याचिख्यासुर्भगवान् जयतीर्थमुनिः ग्रन्थादौ समुचितेष्टदेवताप्रणाममाचरन्नेव चिकीर्षितं निर्दिशति । प्रणम्येति ॥ व्याकुर्वे इत्युत्तमपुरुषप्रयोगबलादहमिति लभ्यते ॥

End:

॥ शब्द इति ॥ शब्दस्याकाशगुणत्वं हि तार्किकस-
तसिद्धमिति भावः । गन्धादिभिरिति । गन्धादिभिः
समानाश्रयत्वस्य वादिप्रतिवादिभ्यामनङ्गीकारादिति भा-
वः । ननु संभवतोऽप्यर्थान्तरस्य कथमुद्धाव्यत्वं न्यूनादेः
संभवादित्यत आह ॥ अत्रेति ॥ पुर........

Subject: Nyāyakalpalatāvyākhyā.

Remarks:—The Ms. is in good condition. This is a third commentary to Jayatīrtha's Nyāyakalpalatā, a commentary on Madhva's Pramānalakṣaṇa by a different author who calls himself the disciple of one Vidyādhīśayati.

॥ न्यायकल्पलताव्याख्या ॥

7956. NYĀYAKALPALATĀVYĀKHYĀ.

Burnell's Catalogue No. 5909. Page 104. Right column. Substance—Paper. Size—$8\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—29. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—336. Author—? Incomplete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

श्रीमज्जयतीर्थपूज्यचरणा आचार्यकृतं प्रमाणलक्ष-
णव्याख्यानं कर्तुकामनाश्चिकीर्षितस्य ग्रन्थस्य निर्विघ्नप-
रिसमाप्त्यादिप्रयोजनाविगीताशिष्टाचारपरम्पराप्राप्तं विशि-

ष्टदेवतानतिरूपं मंगलं कृत्वा शिष्यशिक्षायै ग्रन्थादौ निबध्नन्तः चिकीर्षितं प्रतिजानते ॥ प्रणम्येति ॥ व्याकुर्वे इत्युत्तमपुरुषप्रयोगादहमिति लभ्यते । ननु मंगलस्याव-श्यकत्वादाचार्येणात्र तदकरणात् न्यूनता स्यादित्यतः पुरु-षोत्तमं प्रणम्येति । यद्यपि मङ्गलानुष्ठेयफलाभावात् समा-प्तेरेव तत्फलत्वे अन्वयव्यतिरेकव्यभिचारः ॐ ॐ गुरूनिति । भारवत्त्वेन गुरुत्वस्य घटादिसाधारण्याद्-स्यापि किं तथा गुरुत्वं नेत्यत आह ॥ पूर्णेति ॥ शिष्या-वधानायाचार्येण प्रमाणानां स्वलक्षणं प्रवक्ष्यति ॥ प्रति-ज्ञातं सार्थकमिति भावेन तद्वाक्यमवतारयति ॥ इहेति ॥

End:

॥ न्यूनेति ॥ न्यूनाधिकसंख्या येषां प्रमाणानां तेष्वन्य-तमस्य न्यूनसंख्याकस्याधिकसंख्याकस्याचा ..न्तर्भावः । अन्तर्भावश्च । अत्र यथायोगं संबन्धो न तु यथाक्रमम् । अयमभिप्रायः । अन्येषामागमादीनामनुमानेऽन्तर्भावम-भिप्रेत्य प्रमाणद्वयमेव कणादादिनांगीकृतं । तस्य तदन्त-र्भावोपपादनार्थमधिकसंख्याकप्रमाणानां तेष्वेव त्रिषु अन्त-र्भावोपपादनार्थं चायं विभाग इति ॥

Colophon: Nil.

Subject: Nyāyakalpalatāvyākhyā, A commentary on Jayatīrtha's commentary on Pramāṇalakṣaṇa of Ānandatīrtha.

Remarks:—The Ms. is in good condition. This is by an unknown author. This is another commentary on Jayatīrtha's Nyāyakalpalatā.

॥ कथालक्षणम् ॥

7957. KATHĀLAKṢAṆAM.

Burnell's Catalogue No. 5891. Page 105. Left column. Substance—Paper. Size—8×4 inches. Sheets—2 (2-3 out of 9-15) Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—25. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्री वेङ्कटेशाय नमः ॥

नृसिंहमखिलाज्ञानतिमिराशिशिरद्युतिम् ।
संप्रणम्य प्रवक्ष्यामि कथालक्षणमञ्जसा ॥ १ ॥

End:

अन्तर्भावादिहान्येषां निग्रहाणामिति स्मृ... ।
विद्यापरीक्षापूर्वैव वृत्तिर्वादवितण्डयोः ॥

स्खलितत्वादिमात्रेण न तत्रापि पराजयः ।
वादजल्पवितण्डानामिति शुद्धं स्वलक्षणम् ॥

आनन्दतीर्थयतिना ब्रह्मतर्कानुसारतः ।
कथालक्षणमित्युक्तं प्रीत्यर्थं शार्ङ्गधन्वनः ॥

सदोदितामितज्ञानपूरवारितहृत्तमः ।
नरसिंहप्रियतमः प्रीयतां पुरुषोत्तमः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते कथालक्षणं

समाप्तम् ॥

Subject: Kathālakṣaṇa.

Remarks :—The Ms. is in good condition.

॥ कथालक्षणम् ॥

7958. KATHĀLAKṢAṆAM.

Burnell's Catalogue No. 6230. Page 105. Left column. Substance—Paper. Size—8½ × 3½ inches. Sheets—2nd front (out of 14 sheets) Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—25. Author—Ānandatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7957.

Remarks:—The Ms. is in a good condition.

॥ कथालक्षणम् ॥

7959. KATHĀLAKṢAṆAM.

Burnell's Catalogue No. 5897. Page 105. Left column. Substance—Paper. Size—11⅜ × 4⅞ inches. Sheets—2 (3 & 4 out of 26). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—25. Author—Ānandatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7957.

Remarks:—The Ms. is in good condition.

॥ कथालक्षणम् ॥

7960. KATHĀLAKṢAṆAM.

Burnell's Catalogue No. 6205. Page 105. Left column. Substance—Paper. Size—$7\frac{1}{8}\times2$ inches. Sheets—3. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—25. Author—Ānandatīrtha. Complete; Printed.

Beginning, end colophon and subject—Same as No. 7957.

Remarks:—The Ms. is in good condition.

॥ उपाधिखण्डनम् ॥

7961. UPĀDHIKHAṆḌANAM.

Burnell's Catalogue No. 5893 e. Page 105. Left column. Substance—Paper. Size—$5\frac{1}{2}\times2\frac{3}{4}$ inches. Sheets—2 (14 & 17 out of 35). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—21. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्री श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

नारायणोऽगण्यगुणनित्यैकनिलयाकृतिः ।
अशेषदोषरहितः प्रीयतां कमलालयः ॥ १ ॥

End:

अतः परामात्रयेति पूर्वश्रुतिनिदर्शितः ।

अन्यमीशमिति श्रुत्या भिन्नजीवदृशं गतः ॥

भिन्नत्वेनात्मसादृश्यदो यदेति श्रुतेः सदा ।
मायावादतमो व्याप्तमिति तत्त्वदृशा जगत् ॥

भातं सर्वज्ञसूर्येण प्रीतये श्रीपतेः सदा ।
नमोऽमन्दनिजानन्दसान्द्रसुन्दरमूर्तये ।
इन्दिरापतये नित्यानन्दभोजनदायिने ॥

Colophon:

उपाधिखण्डनं समाप्तम् ॥

Subject: Upādhikhaṇḍana, a tract on the principle of dualistic philosophy.

Remarks:—The Ms. is in good condition.

UPĀDHIKHAṆḌANAM.

Descriptive No.	Collection No.	Substance	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7962	B. L. 5894 c	Paper.	8×4	2 (8 & 4)	13	Devanāgarī.	Complete.
7963	" 5895 c	"	$6\frac{1}{3} \times 3\frac{7}{8}$	2 (8 & 9)	12	"	"
7964	" 5896 c	"	$9\frac{1}{2} \times 3\frac{1}{2}$	1 (6th)	10	"	"
7965	" 5897 f	"	$11\frac{1}{2} \times 4\frac{3}{4}$	2 (5-6)	11	"	"
7966	" 6207	"	$7\frac{1}{3} \times 2$	3	6 or 7	"	"
7967	" 6230 f	"	$8\frac{1}{2} \times 3\frac{1}{2}$	1 (3rd)	20-22	"	"

॥ उपाधिखण्डनव्याख्या—विवरणम् ॥

7968. UPĀDHIKHAṆḌANAVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 5919. Page 105. Left column. Substance—Paper. Size—10⅓ × 5 inches. Sheets—18. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—360. Author—Jayatīrtha. Complete. Not printed

Beginning:

श्री वेङ्कटेशाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

रमाया रमणं नत्वा गुणमाणिक्यमण्डनम् ।
तत्त्वप्रकाशिकाव्याख्यां करिष्यामो यथामति ॥

परमात्मनोऽत्यन्तभिन्नस्य स्वतश्चिदानन्दाद्यात्मकस्यापि जीवस्यानाद्यविद्याकामकर्मादिनिमित्तोऽयं परमार्थ एवान्यथाकारो दुःखाद्यनर्थोपरमेश्वरप्रसादतोऽपगच्छति । [न चासाक्षात्कृतोऽसौ प्रसीदति ।] न चाविदितस्वरूपः शक्यते साक्षात्कर्तुमिति सकलगुणाकरतया निःशेषदोषगन्धविधुरतया च तं प्रतिपादयितुमशेषाम्नायाः प्रवर्तन्ते तदुपकरणभूतब्रह्ममीमांसा चेति परमार्थः ।

End:

नाद्वैतं संभवतीति युक्तमेव नारायणस्यागण्यगुणत्वमित्युपपादितं किमस्य प्रयोजनमित्यत आह ।

मायावादतमो व्याप्तमिति तत्त्वदृशा जगत् ।
भातं सर्वज्ञसूर्येण प्रीतये श्रीपतेः सदा ॥

एवं समापितप्रकरणो भगवानाचार्योन्तेऽपि परमेश्वर-प्रणामस्तवने विधत्ते ।

नमोऽमन्दनिजानन्दसान्द्रसुन्दरमूर्तये ।
इन्दिरापतये नित्यानन्दभोजनदायिने ॥

आत्मसाद्दश्यद इत्युक्तम् । न चायं पुरुषार्थ इत्येतत्परिहारायाद्यं विशेषणम् । नानंदः स्वरूपेण पुरुषार्थ इत्यतो नित्यानन्देति विशेषणमुक्तम् । भोजनं भोगः अनुभव इति यावत् ।

सदा सुरशिरोरत्नप्रभामोषिनखात्त्विषः ।
कमलाकामितुः पादयुगले रतिरस्तु मे ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिततत्त्वप्रकाशिकाविवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

श्रीराजगोपालो विजयते ॥

Subject: Upādhikhaṇḍanavivaraṇa otherwise known as Tattvaprakāśikāvivaraṇa.

Remarks:—The Ms. is in good condition. This is Jayatīrtha's commentary on Ānandatīrtha's Upadhikaṇḍana and is not printed.

UPĀDHIKHAṆḌANAVIVARAṆAM.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7969	B. L. 5921	Paper.	$8 \times 3\frac{1}{8}$	18	8 or 9	Devanāgarī.	Complete.
7970	,, 5923 c	,,	$8 \times 4\frac{1}{2}$	23 (25–47)	9	,,	,,
7971	Not noticed by Burnell Ms. No. 14765	,,	$9\frac{1}{2} \times 3\frac{7}{8}$	14	10	,,	,,
7972	B. L. 5917 b	,,	$9\frac{1}{2} \times 6$	13 (7–19)	14	,,	,,
7973	,, 5920	,,	$9\frac{3}{8} \times 4$	14	8	,,	Incomplete.

॥ उपाधिखण्डनविवरणव्याख्या—मन्दारमञ्जरी ॥

7974. UPĀDHIKHAṆḌANAVIVARAṆA-VYĀKHYĀ—MANDĀRAMAÑJARĪ.

Burnell's Catalogue No. 5918 (b). Page 105. Left column. Substance—Paper. Size—10⅜ × 3⅞ inches. Sheets—54 (27-80; 39th missing). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1350. Author—Vyāsatīrtha. Incomplete. Wants beginning. Not printed.

Beginning:

...योगी स्यादित्यसंभवः । न द्वितीयः । स्वप्राग-भावाप्रसिद्धौ प्रतियोगित्वस्य भावस्य दुर्ज्ञेयत्वात् । नापि द्वितीयः । घटस्यापि घटप्रागभावप्रतियोगिनोऽनादित्वा-पातात् । तृतीयेऽपि मात्रशब्दः किं कात्स्न्र्यवाची किं वा सामान्यवाची । नाद्यः । घटस्यापि कृत्स्नप्रागभावाप्रति-योगिनोऽनादित्वापातात् । न हि घटः पटादिप्रागभाव-प्रतियोगी । न द्वितीयः । आकाशादिप्रतियोगिकप्रागभा-वस्याप्रामाणिकत्वात् * एवमेव कारणशून्यत्वमिति द्वितीयोऽपि निरसनीयः ॥

End:

समापितप्रकरणोऽपि प्रकरणस्य समापितत्वात् प्रमा-मादेः निर्विघ्नपरिसमाप्तिलक्षणप्रयोजनाभावेऽपि भक्तिव-शात्प्रणमति.... चेत्यर्थः । आनन्दस्वरूपस्य परमेश्वरस्य

साद्दश्येन अधिकारिणः किं प्रयोजनमानन्दानुभवाभावा-
दित्यत आह । नित्यानन्देति । एवं समर्पिततत्त्वप्रका-
शिकाव्याख्यो भगवान् टीकाकार....स्यान्ततो नारायण-
प्रीतिः प्रयोजनमिति ज्ञापयन् प्रीतिं प्रार्थयते सदा-
मुरेति ॥

हयग्रीवपदाम्भोजनखदीधितिचन्द्रिकाम् ।
मनश्चकोरसंसारश्चकोर सततं पिब ॥

Colophon:

इति श्रीसमस्तदेवतामस्तकमणिकिरणारुणितपादारविन्दस्यारविन्दनेत्र स्येन्दिरारमणस्य श्रीमुख्यप्राणहृदयारविन्दराजहंस....हयग्रीवस्य किंकरेण श्रीमत्परमहंसपरिव्राजकाचार्येण श्रीब्रह्मण्यतीर्थपूज्यपा-दशिष्येण श्रीनारायणाख्ययतिकुलतिलकादधीतश्रीमध्वशास्त्रामृतेन व्यासयतिना विरचिता मन्दारमञ्जरी समाख्या तत्त्वप्रकाशिका-व्याख्या समाप्ता ॥

श्रीगुर्वन्तर्गत.... हितश्रीवेदव्यासात्मकस्य रामचन्द्रात्मकहयग्रीवात्म-कश्रीप्रयागीमाधवात्मक..... श्रीवेङ्कटेशार्पणमस्तु ॥

Subject: Upādhikhaṇḍanavyākhyā.

Remarks: —The Ms. is in good condition. This author is a great authority on Mādhva Philosophy. This work is not published though many of his works like Tarkatāṇḍava are printed.

॥ मायावादखण्डनम् ॥

7975. MĀYĀVĀDAKHAṆḌANAM.

Burnell's Catalogue No. 5898. Page 105. Left column. Substance—Paper. Size—5½ × 3½ inches. Sheets—3 (12-14 out of 35). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—Ānandatīrtha. Complete. Printed.

Beginning:

अथ मायावादखण्डनम् ॥ ॐ ॥

नरसिंहोऽखिलाज्ञानमतध्वान्तदिवाकरः ।
जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

विमतमनारम्भणीयमन्यथाप्रतिपादकत्वात् ।
यदित्थं तत्तथा यथा संप्रतिपन्नम् ॥

End:

पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ।
भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ॥

इति विष्णोः सर्वोत्तमत्वमेव सर्वशास्त्रार्थत्वेन भगवता श्रुत्या चाभिहितमिति ॥

इति सर्वज्ञमुनिना मायावादतमोऽखिलम् ।
निरस्तं तत्त्ववादेन सतां संशयनुत्तये ॥

नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितं मायावादखण्डनं समाप्तम् ॥

Subject: Māyāvādakhaṇḍana a tract criticising the Advaitic Māyāvāda.

Remarks:—The Ms. is in good condition.

MĀYĀVĀDAKHAṆḌANAM.

Descriptive No.		Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page. or sheet.	Script.	Complete or otherwise.
7976	B. L.	5894 d	Paper.	8×4	1 (4th)	13	Devanāgarī.	Complete.
7977	,,	5895 d	,,	$6\frac{1}{2} \times 3\frac{7}{8}$	3 (6-8)	12	,,	,,
7978	,,	5896 d	,,	$9\frac{1}{2} \times 3\frac{1}{2}$	1 (5th)	10	,,	,,
7979	,,	5897	,,	$11\frac{1}{4} \times 4\frac{1}{2}$	1 (5th)	11	,,	,,
7980	,,	6204	,,	$7\frac{1}{8} \times 2$	3	6	,,	,,
7981	,,	6230 e	,,	$8\frac{1}{2} \times 3\frac{1}{2}$	1 (2nd)	20-22	,,	,,
7982	,,	9843 c	Palm leaf.	$6 \times 1\frac{1}{4}$	2 (11 & 12)	6	Nandināgarī.	,,

॥ मायावादखण्डनाविवरणम् ॥

7983. MĀYĀVĀDAKHAṆḌANAVIVARAṆAM.

Burnell's Catalogue No. 5914. Page 105. Left column. Substance—Paper. Size—9⅓ × 3½ inches. Sheets—8, Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—175. Author—Jayatīrtha. Complete. Not Printed.

Beginning:

श्रीवासुदेवाय नमः ॥ हरिः ॐ ॥

नरसिंहमसह्योरुप्रत्यूहार्तिभिरापहम् ।
प्रणिपत्य व्याकरिष्ये मायावादस्य खण्डनम् ॥

इह हि विविधसांसारिकदुःखदर्शनेन विरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणः तन्निवृत्त्यै परमानन्दावाप्तये च सकलजीवजडात्मकात्प्रपञ्चात् परमार्थतोऽत्यन्तभिन्नं निखिलगुणोदारं निरस्तसमस्तदोषं परं ब्रह्म प्रतिपादयितुं सकलश्रुतिस्मृतीनां तदुपकरणभूतब्रह्ममीमांसायाश्च प्रवृत्तिरिति तत्त्वम् ॥

End:

प्रकरणार्थमुपसंहरंस्तदनुगुणभगवद्वाक्यमेव पठति ॥
नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान्साधयाम्यहम् ॥

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता ।
ध्रियतां हृदये सदये कमलमहिलेन पुरुषेण ॥

Colophon:

इति श्रीमदानन्दभगवत्पादविरचितस्य मायावादखण्डनस्य विवरणं जयतीर्थभिक्षुणा विरचितं समाप्तम् ॥

श्रीवासुदेवार्पणमस्तु । ग्रन्थसंख्या १७५ ॥ श्रीरस्तु ॥

Subject: Māyāvādakhaṇḍanavivaraṇa.

Remarks:—The Ms. is in good condition. This is Jayatīrtha's commentary on Ānandatīrtha's Māyāvādakhaṇḍana.

MĀYĀVĀDAKHAṆḌANAVIVARAṆAM.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7984	B. L. 5915	Paper.	$8\frac{1}{2}\times3\frac{1}{4}$	8	7 or 10	Devanāgarī.	Complete.
7985	„ 5916	„	$8\times4\frac{1}{2}$	10	10	„	„
7986	„ 5917 a	„	$9\frac{1}{2}\times6$	7 (1-7)	14	„	„
7987	„ 5923 d	„	$8\times4\frac{1}{2}$	12 (47-58)	9	„	„

॥ मायावादखण्डनव्याख्या ॥

7988. MĀYĀVĀDAKHAṆḌANAVYĀKHYĀ.

Burnell's Catalogue No. 5918 a. Page 105. Left column. Substance—Paper. Size—11¼ × 3½ inches. Sheets—26 (1-10 & 9-24 out of 80). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Vyāsatīrtha. Incomplete. Wants end. Not printed.

Beginning:

श्री वेङ्कटेशो विजयतेतराम् ॥

कमलारमणं नत्वा गुणमाणिक्यमण्डनम् ।
व्याकुर्वे गहनां मायावादखण्डनपञ्चिकाम् ॥ १ ॥

स्पष्टार्थो य इह ग्रन्थः स न व्याक्रियते मया ।
ग्रन्थगौरवभीरुत्वान्न चोद्ग्रन्थो वहूयते ॥ २ ॥

मंगलाचरणपूर्वकं चिकीर्षितं निर्दिशति ।

॥ नरसिंह्मेति ॥ नरसिंहस्यैव प्रणम्यत्वे हेतुरसह्योरुप्रत्यूहतिमिरापहमिति । प्रत्यूहो नामासह्यत्वं नाम प्रारिप्सितपरिसमाप्तिरूपेष्टविरोधित्वा.... । गुरुत्वञ्च तेषां बहुसंख्याकत्वंमहाश्रेयोविरोधित्वं वा ततश्चायमर्थः ॥

End:

एवं गतिशब्देन शास्त्रप्रतिपाद्यत्वमात्रत्वे लब्धेऽपि परा गतिः परं प्रतिपाद्यमिति प्रतिपाद्यत्वस्वपरशब्देनोत्कृष्टतयोक्तत्वात् तदुत्कृष्टत्वस्यैकदेशप्रतिपाद्यत्वेऽनुपपत्तेः

सर्वप्रतिपाद्यत्वासिद्धिरिति भावेन सर्वग्रहणम् । एवं परा गतिरित्यनेन सर्वशास्त्रप्रतिपाद्यत्वमात्रे लब्धेऽपि केन प्रकारेण परा गतिः सर्वशास्त्रप्रतिपाद्यमिति जिज्ञासायां सा काष्ठेति पूर्वप्रस्तुतभवधित्वलक्षणं सर्वोत्तमत्वमेव.... ॥

Subject: Māyāvādakhaṇḍanavyākhyā otherwise known as Mandāramañjarī. This Ms. abruptly breaks off at the 24th sheet. The other work contained herein is—
Upādhikhaṇḍanavyākhyā
or Mandāramanjarī.

Remarks:—The Ms. is in good condition.

॥ तत्त्वसंख्यानम् ॥

7989. TATTVASAṄKHYĀNAM.

Burnell's Catalogue No. 6280. Page 105. Right column. Substance—Paper. Size—8½ × 8½ inches. Sheets—2nd back (out of 14 sheets). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—12. Author—Ānandatīrtha. Complete. Printed.

Beginning:

अथ तत्त्वसंख्यानम् ।

स्वतन्त्रमस्वतन्त्रञ्च द्विविधं तत्त्वमिष्यते ।
स्वतन्त्रो भगवान् विष्णुर्भावाभावौ द्विधेतरत् ॥

प्राक्प्रध्वंससदात्वेन त्रिविधो भाव इष्यते ।

चेतनाचेतनत्वेन भावोऽपि द्विविधो मतः ॥

दुःखस्पृष्टं तदस्पृष्टमिति द्वेधैव चेतनम्।
नित्या दुःखारमान्ये ? तु स्पृष्टदुःखाः समस्तशः ॥

End:

संसृष्टमण्डं तद्रं च समस्तं संप्रकीर्तितम् ।
सृष्टिः स्थितिः संहृतिश्च नियमो ज्ञानबोधने ॥
बोधो मोक्षः सुखं दुःखमावृतिर्ज्योतिरेव च ।
विष्णुनास्य समस्तस्य समासव्यासयोगतः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितं तत्त्वसंख्यानं समाप्तम् ॥

Subject: Tattvasaṅkhyāna a tract dealing with the principles of dualistic philosophy.

Remarks:—The Ms. is in a good condition.

TATTVASAṄKHYĀNAM.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7990	B. L.	5893 b	Paper.	$5\frac{1}{2} \times 2\frac{3}{4}$	2 (8 & 9)	6	Devanāgarī.	Complete.
7991	„	5894 b	„	8×4	1 (5th)	13	„	„
7992	„	5895 b	„	$6\frac{3}{8} \times 3\frac{7}{8}$	2 (4 & 5)	12	„	„
7993	„	5896 b	„	$9\frac{1}{2} \times 3\frac{1}{4}$	1 (4th)	10	„	„
7994	„	5897 c	„	$11\frac{1}{4} \times 4\frac{3}{4}$	1 (4th)	11	„	„
7995	„	6208	„	$7\frac{1}{8} \times 2$	2	8	„	„
7996	„	9843 c	Palm leaf.	$6 \times 1\frac{1}{4}$	8 (15-17)	9	Nandināgarī.	„

॥ तत्वसंख्यानव्याख्या—विवरणम् ॥

7997. TATTVASAṄKHYĀNAVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 5923. Page 105. Right column. Substance—Paper. Size—8×4⅝ inches. Sheets—13 (1-13 of 133). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Jayatīrtha. Complete. Printed.

Beginning:

श्री लक्ष्मीनृसिंहाय नमः ॥ हरिः ॐ ॥

लक्ष्मीपतेः पदाम्भोजयुगे नत्वा गुरोरपि ।
करिष्ये तत्त्वसंख्यानव्याख्यानं नातिविस्तरम् ॥ १ ॥

मुमुक्षुणा खलु परमात्मा जगदुदयादिनिमित्तत्वेनावश्य-मवगन्तव्य इति सकलसच्छास्त्राणामविप्रतिपन्नोऽर्थः ।

End:

अत एवेत्युक्तम् । सकलसत्त्वादेस्तदधीनत्वात्तद्वस्तुनिमि-त्तमात्रमेव । स्वातन्त्र्येण तु विष्णुरेवास्येश्वर इति ।

पद्मापद्मासनानन्तप्रभृतीदं यदिच्छया ।
सत्तादि लभते देवः प्रीयतां श्रीपतिः स मे ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य तत्त्वसंख्यानस्य

विवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

श्री गुरुभ्यो नमः ॥

Subject: Tattvasaṅkhyānavyākhyā--Vivaraṇa.

Remarks:—The Ms. is in good condition.

This is published with Ānandatīrtha's text and a super-commentary by Satyadharmatīrtha at Kumbakonam and Bombay in 1915.

TATTVASAṄKHYĀNAVYĀKHYĀ—VIVARAṆAM.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page. or sheet.	Script.	Complete or otherwise.
7998	B. L. 5925	Paper.	8×4	5	14 or 15	Devanāgarī.	Complete.
7999	„ 5926	„	$9\frac{1}{2}\times3\frac{1}{2}$	7	11	„	„
8000	„ 5927	„	$8\frac{1}{4}\times4\frac{1}{4}$	4	17-20	„	„
8001	„ 5924	„	$8\frac{1}{4}\times3\frac{1}{2}$	13	8	„	Incomplete

॥ तत्त्वसंख्यानविवरणटिप्पणी ॥

3002. TATTVASAṄKHYĀNAVIVARAṆA ṬIPPAṆĪ.

Burnell's Catalogue No. 5928. Page 105. Right column. Substance—Paper. Size—$10\frac{1}{4}\times4\frac{1}{4}$ inches. Sheets—18. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Yadupati. Complete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

वेदेशतीर्थगुरुमानसकञ्जसंस्थं

हंसावतंसपुरुबोधहृदम्बरस्थम् ।

व्यासं प्रणम्य करवाणि सुतत्त्वसंख्या-

व्याख्याविकासमवलंब्य गुरुप्रसादम् ॥

इह हि परमकारुणिको जयतीर्थश्रीचरणः भगवत्पादीयातिगहनगंभीरतत्त्वसंख्यानं व्याकर्तुकामः प्रारिप्सितपरिसमाप्त्यादिप्रयोजनतया शिष्टाचारपरंपरागतं हरिगुरुप्रणतिं विधाय शिष्यशिक्षायै ग्रन्थादौ तामुपनिबध्नन् स्वव्याख्यायाः विद्वदुपादित्सानिमित्तकं शब्दबाहुल्याभावं वन्दनं श्रोतृबुद्ध्यनुकूलनाय स्वचिकीर्षितं प्रतिजानीते । लक्ष्मीपतेरिति ॥

॥ अतिबहुतरेति ॥ सम्यक् निश्चितप्राबल्यकबहुतरागमैरित्यर्थः। भवतीति। घटत इत्यर्थः। तथा च समाख्यालक्षणोपायाद्विष्णुनैवास्य सर्वं घटत इत्युक्तं भवति। समापितग्रन्थान्तेऽपि मङ्गलमाचरति। पद्मापद्मेति ॥ सत्त्वादित्यत्र आदिपदेन प्रमितिप्र... ग्रहणं। यादृशस्य भगवतः प्रतिपादनमात्रता तादृशस्यैव प्रीतिराशासनीयेति सूचनायैवमुक्तमित्यशेषमतिमंगलम् ॥

श्रावासवी वियति ? व्यक्तं वासुदेवावभासकम्।
व्यासाभिधमहं वन्दे महामोहतमोऽपहम् ॥

Colphon:

इति श्रीयदुपतिविरचिता तत्त्वसंख्यान(विवरण)टिप्पणी
समाप्ता ॥

श्री वेङ्कटेशार्पणमस्तु ॥

Subject: Tattvasaṅkhyānaṭippaṇī.

Remarks:—The Ms. is in good condition. For remarks see under No. 5826.

॥ तत्त्वविवेकः ॥

8003. TATTVAVIVEKAH.

Burnell's Catalogue No. 6230. Page 106. Left column. Substance—Paper. Size—8½ × 3½ inches. Sheets—2nd back (out of 14 sheets). Lines—6 to a Page. Script—

Devanāgarī. No. of Granthas—18. Author—Ānandatīrtha. Complete. Printed.

Beginning:

॥ अथ तत्त्वविवेकः ॥

स्वतन्त्रं परतन्त्रञ्च प्रमेयं द्विविधं मतम् ।
स्वतन्त्रो भगवान् विष्णुर्निर्दोषाखिलसद्गुणः ॥ १ ॥

End:

य एतत्परतन्त्रं तु सर्वमेव हरेः सदा ।
वशमित्येव जानाति संसारान्मुच्यते हि सः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितः तत्त्वविवेकः समाप्तः ॥

Subject: Tattvaviveka, a tract dealing with the essence of Tattva.

Remarks:—The Ms. is in good condition.

TATTVAVIVEKAḤ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
8004	B. L. 5893 c	Paper.	$5\frac{1}{2} \times 2\frac{3}{4}$	2 (10 & 11)	15	Devanāgarī.	Complete.
8005	„ 5894 g	„	8×4	2 (5 & 6)	12	„	„
8006	„ 5895 c	„	$6\frac{1}{4} \times 3\frac{7}{8}$	2 (5 & 6)	12	„	„
8007	„ 5896 c	„	$9\frac{1}{2} \times 3\frac{1}{2}$	2 (4 & 5)	10	„	„
8008	„ 5897 d	„	$11\frac{1}{4} \times 4\frac{3}{4}$	1 (4th)	11	„	„
8009	„ 6209	„	$7\frac{1}{8} \times 2$	2	6 or 7	„	„
8010	„ 9843 d	Palm leaf.	$6 \times 1\frac{1}{4}$	1 (16th)	6	Nandināgarī.	„

॥ तत्त्वविवेकव्याख्या—विवरणम् ॥

3011. TATTVAVIVEKAVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 5923 b. Page 106. Left column. Substance—Paper. Size—8"× 4⅜ inches. Sheets—12 (14-25 out of 133). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—160. Author—Jayatīrtha. Complete. Not Printed.

Beginning:

प्रणम्य रमणं लक्ष्म्याः पूर्णबोधान् गुरूनपि ।
व्याख्यां तत्त्वविवेकस्य करिष्यामो यथामति ॥ १ ॥

ननु परमपुरुषादितत्त्वानां विवेकः शास्त्र एव कृतः । तत्किमनेन प्रकरणेन विक्षिप्तसंग्रहार्थमिति चेत् न संग्रहस्यापि तत्त्वसंख्यान एव कृतत्वात् । सत्यं । तथापि तत्त्वसंख्यानोक्तार्थे साक्षित्वेन भगवत्प्रणीततत्त्वविवेकगतवाक्यान्येतान्येवाचार्यैरुदाहृतानीत्यदोषः । तत्रादौ तावत् सामान्येन तत्त्वस्य विभागोद्देशं करोति ॥

स्वतन्त्रं परतन्त्रं च प्रमेयं द्विविधं मतम् ।

अत्र प्रमेयमित्यनुवादेनैव तत्त्वस्य सामान्यलक्षणञ्चोक्तम् । अनारोपितं हि तत्त्वम् ।

End:

किञ्च विष्णुज्ञानमेव मोक्षसाधनमवगतं तत्किमनेनेत्यत आह ।

य एतत्परतन्त्रन्तु सर्वमेव हरेः सदा ।
वशमित्येव जानाति संसारान्मुच्यते हि सः ॥

यद्यपि केवलस्यास्य ज्ञानं न पुरुषार्थोपयोगि तथापि परमपुरुषाधीनतयाऽवगतं भवत्येव मोक्षसाधनमित्येतद्वेनिदितान्ये इत्यादिश्रुतिसिद्धमिति हि शब्देन सूचयति ॥

करतलमिलितामलकप्रख्यं यस्याखिलं विश्वम् ।
कमलापरिवृढममलं वन्दे तं व्यपादाब्जम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादोदाहृततत्त्वविवेकविवरणं जयतीर्थभिक्षुविरचितं समाप्तम्

Subject : Tattvavivekavyākhyā—vivaraṇa.

Remarks:—The Ms. is in good condition.

TATTVAVIVEKAVYĀKHYĀ—VIVARAṆAM.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
8012	B. L. 5899	Paper.	$9\frac{1}{4} \times 5$	4	18-20	Devanāgarī.	Complete.
8013	„ 5929	„	8×3	9	8	„	„
8014	„ 5930	„	$9\frac{1}{2} \times 3\frac{1}{2}$	6	11	„	„
8015	„ 5931	„	$9\frac{1}{2} \times 3\frac{7}{8}$	8	10 or 11	„	„
8016	„ 5932	„	$7\frac{7}{8} \times 4\frac{3}{8}$	10	11	„	„
8017	Not noticed by Burnell Ms. No. 14767	„	$9\frac{1}{2} \times 4\frac{1}{2}$	15	9	„	Incomplete.

॥ तत्त्वोद्योतः ॥

8018. TATTVODYOTAḤ.

Burnell's Catalogue. No. 6280 h. Page 106. Left column.

Substance—Paper. Size—$8\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—2 (3-4 out of 14). Lines—20 to 22 to a Page. Script—Devanāgarī. No. of Granthas—135. Author—Ānandatīrtha. Complete. Printed.

Beginning:

अथ तत्त्वोद्योतं(तः) ॥

सर्वत्राखिलसच्छक्तिः स्वतन्त्रोऽशेषदर्शनः ।
नित्याज्ञतादृशचिच्चेत्ययन्तेष्टो नो रमापतिः ॥

End.

जयत्यमितपौरुषः स्वजनतेष्टचिन्तामणिः ।
अजेशमुखवन्दितो गुणगणार्णवः श्रीपतिः ॥

सर्वज्ञसन्मुनीन्द्रोच्चसन्मनःपङ्कजालयः ।
अजितो जयति श्रीशो रमाबाहुलताश्रयः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितः तत्त्वोद्योतः समाप्तः ॥

श्री रामार्पणमस्तु ॥

Subject: Tattvodyota, a dualistic tract.

Remarks:—The Ms. is in good condition. This tract is printed along with Jayatīrtha's commentary at Bombay in 1897.

TATTVODYOTAH.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
8019	B. L. 5893 g	Paper.	$5\frac{1}{2}\times2\frac{3}{4}$	13 (19-35)	6	Devanāgarī.	Complete.
8020	„ 5894 h	„	8×4	4 (6-9)	13	„	„
8021	„ 5896 g	„	$9\frac{1}{2}\times8\frac{1}{2}$	6 (7-12)	10	„	„
8022	„ 5897 h	„	$11\frac{3}{8}\times4\frac{7}{8}$	4 (6-9)	11	„	„
8023	„ 5933	„	$8\frac{1}{2}\times3\frac{1}{8}$	8	8 or 9	„	„
8024	„ 6210	„	$7\frac{1}{8}\times2$	12	6	„	„
8025	„ 9843 b	Palm leaf.	$8\frac{1}{2}\times1\frac{1}{2}$	11	6	Nandināgarī.	„

॥ तत्त्वोद्योतव्याख्या—विवरणम् ॥

8026. TATTVODYOTAVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 5935. Page 106. Left column. Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{1}{2}$ inches. Sheets—65. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Jayatīrtha. Complete. Printed.

Beginning:

श्री लक्ष्मीनृसिंहो जयति ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥ हरिः ॐ ॥

विश्वोत्पत्तिस्थितिध्वंसकारणं रमणं श्रियः ।

अभिवन्द्य यथाबोधं तत्त्वोद्योतं विवृण्महे ॥ १ ॥

End:

सर्वज्ञसन्मुनीन्द्रोऽत्र सन्मनःपङ्कजालयः ।

अजितो जयति श्रीशो रमाबाहुलताश्रयः ॥

श्रीमदानन्दतीर्थार्यहृदयाम्भोजमन्दिरः ।

कमलाश्लेषरसिकः प्रीयतां मः परः पुमान् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वोद्योतस्य टीका जयतीर्थभिक्षुविरचिता समाप्ता ॥ श्रीवासुदेवार्पणमस्तु ॥

शके १५६२ वर्षे विरोधिकृन्नामसंवत्सरे उत्तरायणे ग्रीष्मऋतौ आषाढमासे शुक्लपक्षे पञ्चम्यां भृगुवासरे तञ्जपुरक्षेत्रे श्रीलक्ष्मीनृसिंह-

सन्निधौ इदं पुस्तकं समाप्तम् ।

श्रीकृष्णार्पणमस्तु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

ग्रन्थसंख्या ॥ १५०० ॥ श्रीमद्राजेश्री जयरायस्येदं पुस्तकं ।

स्वार्थे परोपकारार्थे च ।

श्रीवेदव्यासार्पणमस्तु ॥

Subject: Tattvodyotavivaraṇa a tract on principles of dualistic philosophy.

Remarks:—The Ms. is in good condition. This is published along with Ānandatīrtha's text at Bombay in 1897.

———

TATTVODYOTAVYĀKHYĀ—VIVARAṆAM.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page. or sheet.	Script.	Complete or otherwise.
8027	B. L.	5938	Paper.	$10\frac{1}{2} \times 2\frac{1}{2}$	51	9 or 10	Devanāgarī.	Complete.
8028	,,	5940	,,	$9\frac{3}{4} \times 6$	38	18	,,	,,
8029	,,	5923 f	,,	$8 \times 4\frac{3}{8}$	55 (78–133)	9	,,	Incomplete.
8030	,,	5934	,,	$10\frac{1}{2} \times 4\frac{1}{4}$	8	13	,,	,,
8031	,,	5936	,,	$8\frac{1}{2} \times 3\frac{1}{2}$	67 (2–68)	10 or 11	,,	,,
8032	,,	5937	,,	$9\frac{1}{2} \times 3\frac{3}{4}$	40	10	,,	,,
8033	,,	5939	,,	$9\frac{1}{2} \times 3\frac{3}{4}$	12	10-12	,,	,,
8034	,,	5941	,,	$10\frac{1}{2} \times 4\frac{1}{4}$	35 (15–49)	11	,,	,,
8035	Ms. No. 14766		,,	$8\frac{3}{8} \times 3\frac{3}{8}$	12 (2–13)	16	,,	,,

DETAILED REMARKS

on the

TATTVODYOTAVIVARAṆA MSS.

8031. Colophon:

इति श्रीमदानन्दतीर्थ + तत्त्वोद्योतविवरणं जयतीर्थमुनिविरचितं समाप्तम् ॥ श्रीमल्लक्ष्मीनृसिंहार्पणमस्तु ॥

शालिवाहनशके १४७९ पिङ्गळसंवत्सरे आश्वयुजमासे पौर्णिमायां शूरपालवासिना नरसिंहेन लिखितम् ।

कृष्णार्पणमस्तु ॥ तदीयमेतत्पुस्तकम् ॥

॥ तत्त्वोद्योतविवरणटीका ॥

8036. TATTVODYOTAVIVARAṆAṬĪKĀ.

Burnell's Catalogue No. 5942. Page 106. Left column. Substance—Paper. Size—$8\frac{3}{8} \times 4\frac{3}{8}$ inches. Sheets—112. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1630. Author—Vedeśatīrtha. Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥ हरिः ॐ ॥

जयति जगति जन्मस्थेमसंहारकर्ता
चिदचिदखिलयन्ता यः स्वतन्त्रोऽखिलज्ञः ।
विततविमलशक्तिः पूर्णबोधेष्टरूपः
श्रुतिततिमतमुक्तामुक्तभेदो रमेशः ॥ १ ॥

व्यासं नत्वा तथा मध्वं जयार्यं च गुरूनपि ।

व्याख्यास्ये मन्दबोधाय तत्त्वोद्योतस्य पञ्चिकाम् ॥

स्वेष्टदेवतानमनपूर्वकं चिकीर्षितं निर्दिशति ।

End:

मात्सर्यादथवातिकौशलधिया यद्वाखिलार्थज्ञता-

मानाय्नेदमकारि किन्तु सुधियां तुष्ट्यै स्वधीशुद्धये ।

यद्वा मन्दधियाममन्दमतिना किं कार्यविज्ञप्तये

यत्नोऽयं हरितुष्टिकार्यपि भवेद्वेदेशभिक्षोर्मम ॥

गुरुरघूत्तमयोगिसुशिक्षितो

जयमुनेरभिसन्धिरयं मम ।

प्रकटितो लवबोधहृदम्बुज

स्थितरमापतितृप्तिमभीप्सता ॥

Colophon:

इति श्रीमद्वेदव्यासतीर्थपूज्यचरणशिष्येण वेदेशभिक्षुणा विरचितं तत्त्वोद्योतपञ्चिकाव्याख्यानं समाप्तम् ॥

श्रीकृष्णार्पणमस्तु ॥

चैत्रशुद्धएकादश्यामारभ्य चैत्रवदिएकादश्यां धनिष्ठानक्षत्रे गुरुवारे इदं पुस्तकं ऊत्तूरु अनन्ताचार्यस्य पुत्र नारायणेन लिखितं समाप्तम् ॥

श्रीकृष्णार्पणमस्तु ॥ श्रीविष्णुपूजास्तु ॥

Subject: Tattvodyotavivaraṇaṭīkā, a gloss on Jayatīrtha's Tattvodyotavivaraṇa.

Remarks:—The Ms. is in good condition.

Jayatīrtha's Tattvodyotavivaraṇa, a commentary on Ānanda Tīrthā's Tattvodyota, has in its turn evoked many glosses from several scholars and this author is one of them. He is the disciple of Vyāsatīrtha. This work is printed at Bombay in 1898 under the name Tattvodyotavivaraṇa Vyākhyāna or Ṭippaṇī.

॥ तत्त्वोद्योतविवरणटीका ॥

8037. TATTVODYOTAVIVARAṆAṬĪKĀ.

Burnell's Catalogue No. 5943. Page 106. Left column. Substance—Paper. Size—9×4 inches. Sheets—67. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1650. Author—Vedeśatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8036.

Remarks:—The Ms. is in good condition. The date is given as:

शके १५९० कीलकसंवत्सरे कृष्णभट्टसुतभीमसेन लिखितम् ।

The Ms. is therefore dated A. D. 1668.

॥ तत्त्वोद्योतविवरणटीका ॥

8038. TATTVODYOTAVIVARAṆAṬĪKĀ.

Burnell's Catalogue No. 5944. Page 106. Left column. Substance—Paper. Size—$8\frac{1}{2}\times4\frac{3}{4}$ inches. Sheets—20. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Rāghavendra. Incomplete. Printed.

Beginning :

श्री वेदव्यासाय नमः । अविघ्नमस्तु ॥

जगज्जन्मस्थेमक्षयनियमा यदपांगतः ।

तं वन्दे परमानन्दमिन्दिरामन्दिरोरसम् ॥ १ ॥

प्रणम्य श्रीमदानन्दतीर्थादिगुरुशेखरान् ।

व्याख्यास्यामि यथाबोधं तत्त्वोद्योतस्य पञ्चिकाम् ॥

End :

॥ मुक्तप्रतीति ॥ मुक्तपदेन नियामकस्य परमात्म-
नोपि ग्रहणादेवमुक्तम् । नियम्यत्वेति । आद्यपद्योक्तनिय-
म्यत्वघटनायैवात्र भेदसाधनादिति भावः । उभयसाधारण-
मिथ्यात्वसाधने कथमिष्टसिद्धिरित्यत आह । तस्मिन्निति ॥
उभयेति । वादिप्रतिवादीत्यर्थः तथा चाप्रसिद्धाविशे-
षण...... ।

Subject: Tattvodyotavivaraṇaṭīkā, A gloss on Jayatīrtha's Tattvodyotavivaraṇa.

Remarks :—The Ms. is in good condition. This Ms. deals with beginning only.

This is another gloss on Vyāsatīrtha's Tattvodyotavivaraṇa. This is by Rāghavendra, disciple of Sudhīndra, a celebrated name in these parts in the 16th & 17th centuries. This Sudhīndra appears to have had kanakābhiṣeka in the court of Raghunātha Naik the third Nayak ruler of Tanjore. This work is published at Bombay in 1898 under the name Tattvodyotaṭīkā—Bhāvadīpa. Bhavadīpā seems to be a com-

mon term applied by Rāghavendra to many of his commentaries and glosses. For further remarks see under No. 7855.

॥ तत्त्वोद्योतविवरणटीका ॥

8039. TATTVODYOTAVIVARAṆAṬĪKĀ.

Burnell's Catalogue No. 5915. Page 106. Left column Substance—Paper. Size—12½×5 inches. Sheets—48 (96-138). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1450. Author—Rāghavendra. Incomplete; Wants beginning and end. Printed.

Beginning:

—यमनसंभवात् + जन्मादिहेतुत्वमेकनिष्ठं नेति शङ्का परास्ता। अत एव मूलोपात्तमेव विशेष्यं श्रियो रमणमित्युक्तं जन्मादिचतुष्टयस्यैव कृत्स्नजगाद्विषयत्वादुत्पत्त्यादेरेव ग्रहणम्।

End:

एकजीववादपक्ष इत्यादिनोक्तमेकजीवनिराकरणं मुक्तामुक्तयोर्भेदाभावे मुक्तस्य संसारः संसारिणो मुक्तत्वं स्यादिति वाक्यानन्तरमेव संगतं विपक्षे......।

Subject: Tattvodyotavivaraṇaṭīkā a gloss on Jayatīrtha's Tattvodyotavivaraṇa.

Remarks:—The Ms. is in a decaying condition. This Ms. wants beginning and end.

॥ तत्त्वोद्योतविवरणटीका—मन्दप्रबोधिनी ॥

8040. TATTVODYOTAVIVARAṆAṬĪKĀ-MANDAPRABODHINĪ.

Burnell's Catalogue No. 5946. Page 106. Left column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—71 (12th wanting). Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—1750. Author—Narasimhayati. Complete. Not Printed.

Beginning:

श्री वेदव्यासाय नमः । श्रीमुष्णवराहाय नमः ॥

श्रीगुरुभ्यो नमः । निर्विघ्नमस्तु ।

मय्येव स्मरता(प)भोगनिवहः स्यात्सर्वदा न त्वयी-
त्यन्योन्यं धरणीसमुद्भवयोर्वापा(ङ्क)भागार्हयोः ।
संप्राप्ते...मोदकलहे तच्छान्तये भाति यो
मध्यस्थः प्रहसन्निवाशु वरदं काञ्चीपतिं संश्रये ॥ १ ॥

श्रीमध्वदेशिकश्रीमज्जयतीर्थगुरूनपि ।
श्रीसत्यनाथतीर्थार्यपादान् वन्दे विदे सदा ॥ २ ॥

यत्कटाक्षेक्षणाद्बालो मन्दधीरभवद्दुतम् ।
भालकं सत्यनव्येशं वावंदि मम देशिकम् ॥ ३ ॥

आद्यो यो नरसिंहाख्यस्तत्कृपामात्रसाधनः ।
स्वबुद्धिशुद्ध्यै तनुते तत्त्वोद्योतस्य टिप्पणम् ॥ ४ ॥

इह खलु श्लोके जयतीर्थश्रीगुरुचरणाः स्वस्य मंगलाय

शिष्यशिक्षायै च विशिष्टेष्टदेवताभिवन्दनं वाक्ये प्रविष्टं विधाय शिष्यमनःसमाधानकारणं प्रतिज्ञावाक्यं च निबध्नाति ॥ विश्वेति ॥ उत्पन्नस्यैव देहादिविशिष्टतया स्थितिः तथा स्थितिमत एव ध्वंस इति सर्वाध्यक्षसिद्धत्वेनोत्पत्तेः स्थित्युपजीव्यत्वात् स्थितेश्च ध्वंसं प्रति तथात्वात् प्रधानक्रमेणायं निर्देशः ॥

End:

॥ श्रीमदानन्दतीर्थेति ॥ अत्र पूर्वार्धेन मूलं...... भवति । कमलाश्लेषरसिक इत्यनेन रमाबाहुलताश्रय.... त्यशेषमतिमंगलम् ।

अहंपूर्वमहं पूर्वमिति वाचं स्वसेवने ।
श्रीभूदेव्योर्निशम्येष हासास्यो वरदोऽवतु ॥ १ ॥

यद्वचःकिरणैर्निद्राध्वांतं ध्वंसमभूत्क्षितौ ।
श्रीमच्छ्रीजयसूर्याख्यमणी स्यातां हृदम्बरे ॥ २ ॥

विश्रान्तं व्याप्तिभक्त्यादितारतम्यं महात्मनि ।
यस्मिन्तत्सत्यनाथेन्द्रपदनीरजमाश्रये ॥ ३ ॥

यत्कीर्तिधवलच्छत्रं त्रिध्यण्डप्रतिबन्धतः ।
संकोचत्वं नैव भेजे वान्सत्याभिनवान्भजे ॥ ४ ॥

येषां द्वारि विचिन्वन्ति विद्वद्वाराः पतीन् गतान् ।
वाक्यार्थं प्रष्टुमानौमि रघुनाथपितॄन्मम ॥ ५ ॥

Colophon:

श्रीसत्याभिनवाभिधेड्यचरणच्छात्रो नृसिंहाभिध-

स्तात्पर्याशयदीपिका नरहरिप्राज्ञान्ववायोद्भवः ।

चक्रे तत्करुणाबलान्न तु धिया मन्दप्रबोधं तत-

स्तत्स्वान्तालय........द्रघुपतिः प्रीतोऽस्तु नारायणः ॥

इति श्रीमत्सकलविद्वच्चक्र(चूडामणि) श्रीमज्जयतीर्थाचार्यवर्यविरचि-

तश्रीतत्त्वोद्योतटीकाटिप्पणं मन्दप्रबोधनं नरसिंहविरचितं

समाप्तम् ॥

.........शेगृहीतसंरक्षणलक्ष्मभाजाम् ।

अनेकजन्मार्जित........निष्कृतिः स्यात् ॥

सत्याभि...तराजानां यत्से..............

...............नाल्पस्य तपसः फलम् ।

अत एव श्रयन्ते—

....नर्हामस्य भूयान्मे जन्मजन्मनि ।

श्रीसत्याभिनवश्रीगुरुराजाय नमो नमः । ....जाय नमः । श्री सत्या-

भिनवश्रीपादेभ्यो नमः ॥

Subject: Tattvodyotanavivaraṇaṭīkā—Mandaprabodhinī.

Remarks:—The Ms. is in a decaying condition.

This is a third gloss on the same Tattvodyotavivaraṇa of Jayatīrtha. But this is not printed.

॥ कर्मनिर्णयः ॥

8041. KARMANIRṆAYAḤ.

Burnell's Catalogue No. 6230 l. Page 107. Left column.

Substance—Paper. Size—8½ × 3½ inches. Sheets—5 (4-8 out of 14). Lines—20-22 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Ānandatīrtha. Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः ॥

य इज्यते विधीशानशक्रपूर्वैः सदा मखैः ।
रमाप्रणयिने तस्मै सर्वयज्ञभुजे नमः ॥

महानाम्नीनामृचामुपसर्गाय उपसर्जनभूतास्तानुपसृजति । संयोजयति महन्नाम यास्वृक्षु विद्यते । ता महन्नाम्न्यः परस्परस्य ब्रह्मणो यन्नामेन्द्रादिकं तन्महार्थत्वान्महत् ।

End:

तिष्ठमानस्य तद्विद इत्यादि श्रुतिस्मृतिभ्यः ।
नमो नारायणायाजभवशक्रोष्णरुङ्मुखैः ।
सदा वन्दितपादाय श्रीशाय श्रेयसेऽधिकम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितः कर्मनिर्णयः समाप्तः ॥

Subject: Karmanirṇaya.

Remarks:—The Ms. is in good condition.

॥ कर्मनिर्णयः ॥

8042. KARMANIRṆAYAḤ.

Burnell's Catalogue No. 6211. Page 107. Left column.

Substance—Paper. Size—7⅛×2 inches. Sheets—26. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Ānandatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8041.

Remarks:—The Ms. is in good condition.

॥ कर्मनिर्णयः ॥

8043. KARMANIRṆAYAḤ.

Burnell's Catalogue No. 5894. Page 107. Left column. Substance—Paper. Size—8×4 inches. Sheets—6 (10-15 out of 15) Lines—14-19 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Ānandatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 8041.

Remarks:—The Ms. is in a good condition.

॥ कर्मनिर्णयटीका ॥

8044. KARMANIRṆAYAṬĪKĀ.

Burnell's Catalogue No. 5947 a. Page 107. Left column. Substance—Paper. Size—11⅜×4 inches. Sheets—22. Lines—10 to a Page. Script—Devanāgarī. No. of Gran-

thas—922. Author—Jayatīrtha. Complete. Not printed.

Beginning:

श्री वेदव्यासाय नमः हरिः ॥ ॐ ॥

ब्रह्मणोऽपि नियन्मन्त्रभेदा वेदगिरोऽखिलाः ।
यत्क्रीडाभूमयस्तस्मै परस्मै ब्रह्मणे नमः ॥ १ ॥

प्रणम्य श्रीमदानन्दतीर्थार्यपदपङ्कजे ।
गुरूणाञ्च यथाबोधं व्याकुर्वे कर्मनिर्णयम् ॥ २ ॥

महानाम्नीनामित्यादि खण्डार्थव्याख्यानव्याजेन कर्मनिर्णयं कर्तुकामो भगवानाचार्यो विघ्नविघातादिहेतुं समुचितविशिष्टेष्टदेवताप्रणाममाचरति य इज्यत इति । सकलवाज्ञ्नसदेवता...दौ वन्दनीयेत्यतो रमाप्रणयिन इत्युक्तम् । ननु यज्ञविद्याव्याख्यानावसरे कथं रमाप्रणयिनो वन्दनं समुचितं तस्या अपि तस्मिन् समन्वयकरण...आह ॥ सर्वज्ञभुज इति ॥

End:

पुरुषार्थं यदार्पणं यस्मिंस्तप आदीनामर्पणं एष उ...दाश्वान्यजमानः फलत्वस्यात् । इतरस्तु तदभावाद्यजमान ....सः उपनिषीदतीत्युपनिषद्योग्याभावं याथात्म्यभूतमनादिमहान्तं गुणपूर्णमीश्वरञ्च विश्वस्य तद्विदो ब्रह्मविदः त्तिष्ठमानस्य निष्ठावता दातुर्यजमानस्य रात्रिर्मित्रं पराय-

णश्च न पुरतद्विद इति नम इति समये यज्ञे श्रुतिस्मृति-
भ्योऽयमर्थो वसीयते ॥ समापितग्रन्थोऽप्याचार्यः प्रचय-
गमनाद्यर्थे भगवत्प्रणाममाचरति नम इति मम श्रेयसे ॥

यत्संबन्धेन कर्माणि फलवन्ति भवन्ति हि ।
यः सर्वकर्मणां कर्ता तस्मै भगवते नमः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य कर्मनिर्ण-
यस्य टीका जयतीर्थमुनिविरचिता समाप्ता ॥

गुरुराजो विजयतेतराम् श्रीः ॥

Subject: Karmanirṇayaṭīkā a commentary on Advaitatīrtha's Karmanirṇaya by Jayatīrtha.

Remarks:—The Ms. is in good condition.

॥ कर्मनिर्णयटीकाव्याख्या— कर्मप्रकाशः ॥

8045. KARMANIRṆAYAṬĪKĀVYĀKHYĀ-KARMAPRAKĀŚAḤ.

Burnell's Catalogue No. 5918. Page 107. Left column. Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{3}{8}$ inches. Sheets—57. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Satyanāthayati. Complete. Not printed.

Beginning:

श्री वेदव्यासाय नमः ॥

रामचन्द्रं गुणैः पूर्णं सर्वकर्मफलप्रदम् ।
ब्राह्मणोपनिषन्मन्त्रैर्वन्द्यं वन्दे रमापतिम् ॥ १ ॥

प्रणम्य पादयुगलं गुरोः सत्यनिधेर्मुनेः ।
कर्मनिर्णयटीकायाः भावं वक्ष्यामि शक्तितः ॥ २ ॥

कर्मनिर्णयं व्याख्यातुकामः टीकाकारः मंगलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति ॥ ब्राह्मणेति ॥ गुरुप्रणामनिबन्धपूर्वकं चिकीर्षितं प्रतिजानीते ॥ प्रणम्येति ॥

End:

ननु 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति वचनात् अनुभूये[ते]ति भाव्यम् ॥ अनुभू[त]त्वेति कथमित्यत आह । 'क्त्वापि छन्दसि'इति वचनादिति । अनञ्समासे छन्दसि क्त्वा इत्यस्य क्त्वा इत्यादेशो भवतीति सूत्रार्थः इयञ्च व्यवस्थेति । केचनेमं श्लोकमाविशन्ति । केचन हीनतरं वाविशन्तीति वाशब्दो नोक्तव्यवस्थेत्यर्थः । प्रचयगमनार्थमिति । वस्तुतः प्रचयगमनप्रयोजकं प्रणामं स्वभावादाचरतीत्यर्थः । सर्वकर्मणां कर्तेति । सर्वकर्मणां प्रयोजककर्तेत्यर्थः ।

य इज्यते मखैः सर्वैः फलदः सर्वकर्मणाम् ।
यस्स्तुत्यो द्विविधैः शास्त्रैस्तस्मै भगवते नमः ॥

Colophon:

Śāṇḍilya's Bhakti Sūtras are one hundred in number and this Ms. is an incomplete one. These Sūtras are commented upon by Bhavadevamiśra, Svapneśvara and others and are published with their commentaries. Translated editions of the Sūtras with commentaries are published at Calcutta edited by Hṛṣīkeśaśāstri and at Allahabad in the Sacred Books of the Hindus Series. Atmarama Moreśvar Chattre has written a metrical epitome of these sūtras which is published at Bombay in 1904.

———

॥ भक्तिमीमांसाभाष्यम् ॥

8225. BHAKTIMĪMĀMSĀBHĀṢYAM.

P. A. Collection No. 106.

Substance—Paper. Size—9¾×4½ inches. Sheets—30. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Svapneśvara. Complete. Printed.

Beginning:

श्री गणेशाय नमः ॥

गोविन्दचरणाम्भोजमधुनो महदद्भुतम् ।

यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥ १ ॥

प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।

शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥ २ ॥

तस्मात् पुरुषार्थहेतुत्वात् धर्मस्येव भक्तेर्मीमांसाविधि-त्सया इदं सूत्रम् ॥

॥ अथातो भक्तिजिज्ञासा ॥

End :

अन्यथाऽभावेप्यभावान्तरस्वीकारप्रसङ्गात् । इति । प्रल-ये तु प्रलयाख्यविकारातिरिक्तविकारस्याभाव एव सं-स्कारस्तु सूक्ष्मात्मना तिष्ठन्तीति न कोपि दोषः ।

Colophon:

इति श्री स्वप्नेश्वराचार्यविरचिते शाण्डिल्यशतसूत्रीयभाष्ये तृतीया-ध्यायस्य द्वितीयमाह्निकम् ॥

समाप्तश्चायमध्यायः । समाप्ता चेयं त्रिलक्षणी भक्तिमीमांसा ॥

गुरुदेवतार्पितमस्तु । वीरेश्वरपण्डितस्येदं पुस्तकम् ।

Subject : Bhaktimīmāmsā Bhāṣya.

Remarks :—The Ms. is in a decaying condition. On the title page is given :—

'जगन्नाथपण्डितस्य स्वम् ॥'

The Sūtras with this commentary has been published with

an English translation at Allahabad in the "Sacred Books of the Hindus" Series.

॥ भक्तिमीमांसाभाष्यम् ॥

8226. BHAKTIMĪMĀMSĀBHĀṢYAM.

P. A. Collection No. 107 b.

Substance—Paper. Size—10 × 4½ inches. Sheets—13 (18 & 38-49). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Nārāyaṇatīrtha. Incomplete. Not Printed.

Beginning:

' ....ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥

गोपगोपीगवावीतं सुरद्रुमलताश्रयम् ।

चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः ' ॥

इति शेषेणार्थः । जन्मकर्मविद इति कथनेन—

' विग्रहो हविषां भोग ऐश्वर्यञ्च प्रसन्नता ।

फलदातृत्वमित्येतन्न तद्विग्रहपञ्चकम् ॥ '

इति प्रलपतां मीमांसकानां मतं न सम्यगिति ध्वनितम् ॥

End.

आविरिति ॥ आविस्तिरोभावाविकाराः स्युः क्रियाफलसम्बन्धात् ॥ १०२ ॥

जन्यानां पदार्थानां सामाग्र्या पूर्वं सत एवाविर्भावस्त-

दानीं सत एव ज्ञानातिरिक्तनाशकेन तिरोभावलक्षणो नाशः क्रियते। न तार्किकोक्तौ जनितानाशौ कुतः क्रियाफल-संयोगात् करोति घटं नाशयति घटमित्यादिना धात्वर्थ-क्रियाफलयोरुत्पत्तिनिवृत्त्योस्सम्बन्धप्रतिपादनात् । न हि पूर्वमसतो जायमानधर्मान्तरसम्बन्धः क्वापि दृष्टः सम्भवति वाऽतिप्रसक्तेरित्याद्यन्यत्र विस्तरः । एतत्सर्वं कथनं कारणेनेश्वरेण कार्यस्याभेदसम्पत्तये तस्मिन्सत्येव ब्रह्मज्ञानात्सर्वज्ञानेन वैराग्यादनन्यभक्त्या तत्प्राप्तिसम्भवादित्यास्तां विस्तरः ॥

Colophon:

इति श्री नारायणतीर्थकृतशाण्डिल्यसूत्रभाष्ये तृतीयस्य द्वितीयमाह्निकम् समाप्तम् ॥

Subject: Bhaktimīmāmsābhāṣya otherwise known as Śāṇḍilyasūtravṛtti.

Remarks:—The Ms. is in a fairly good condition.

This is a Vṛtti on Śāṇḍilya Sūtras. This is not published. The Ms. is an incomplete one and so complete detail about the author is wanting. It is doubted if this author is the same as the author of commentaries on Śāṅkhya and Yoga Sūtras and Viśvanātha's Kārikāvalī, and the disciple of Rāmagovinda. But the similarity of the name coupled with the fact that it is on the sūtras only that the author has commented in all Darśanas which he dealt with lends weight to the question of identity.

॥ भक्तिसिद्धान्तः ॥

8227. BHAKTISIDDHĀNTAḤ.

Burnell's Catalogue No. 7044 b. Page 97. Left column.
Substance—Paper. Size—$10\frac{3}{4} \times 5\frac{3}{8}$ inches. Sheets—2. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—15. Author—? Complete. Not Printed.

Beginning :

भक्तिसिद्धान्तः । भो पूर्णाभिषिक्तमसत्यं । कथमनित्यत्वात् । तथा हि श्रुतेः 'यत्र तस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिना बन्धज्ञानिनः पुरुषस्य आत्मातिरेकादर्शनात् तदानीं विमर्शः कुत्र कल्पनीयः ।

End :

मन्दबुद्धीनां युष्माकं भृग्वादिसमता कथं स्यात् भृगुपादताडितो ब्रह्मा विप्रियमेव चकार । अगस्त्यादिषु समुद्रपानादिसाहसकर्मणि वर्तते । भवतां तादृशा भक्तिः कथं नास्ति । तस्मान्मूढबुद्धिं परित्यज्य ब्राह्मण्यात् भ्रष्टैः भवाद्भिः प्रायश्चित्तं कर्तव्यम् ॥

Colophon : Nil.

Subject : Bhaktisiddhāntaḥ, alias Śaktisiddhānta a treatise refuting the superiority of Bhakti and establishing that of knowledge.

Remarks:—The Ms. is in good condition and full of scriptorial blunders.

॥ भक्तिरसामृतसिन्धुः ॥

8228. BHAKTIRASĀMṚTASINDHUḤ.

Burnell's Catalogue No. 6403. Page 95. Right column. Substance—Paper. Size—$12\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—119. Lines—9-11 to a Page. Script—Devanāgarī. No. of Granthas—2870. Author—Sanātana Gosvāmi. Complete. Not Printed.

Beginning:

अखिलरसामृतमूर्तिः
प्रसृमररुचिरुद्धताकापालिः(?) ।
कलितश्यामा......
राधाप्रेयान्विधुर्जयति ॥

हृदि यस्य प्रेरणया प्रवर्तितोऽहं वराकरूपोऽपि ।
तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ॥

विश्राममन्दिरतया यस्य सनातनतनोर्मदीशस्य ।
भक्तिरसामृतसिन्धुः भवतु सद्भ्यः प्रमोदाय ॥

End:

एवमन्येऽपि विज्ञेयास्तेऽद्भुतापरसादयः ।
उत्तमास्तु रसाभासाः कैश्चिद्रसतयोदिताः ॥

भावाः सर्वे तदाभासरसभावाश्च केचन ।
अमी प्रोक्ता रसाभिज्ञैः सर्वेऽपि रसना रसाः ॥

भारत्याद्याश्चतस्रस्तु रसावस्थानसूचिकाः ।
वृत्तयो न प्रमातृत्वादुक्ता नाटकलक्षणे ॥

Colophon:

इति भक्तिरसामृतसिन्धौ उत्तरविभागे रसाभासलहरी ।

ग्रन्थस्य गौरवभयादस्या भक्तिरसाश्रियः ।
समाहृतसमासेन मया सेयं विनिर्मिता ॥

गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी ।
तुष्यतु सनातनोऽस्मिन्नुत्तरभागे रसाम्भोधेः ॥

इति चतुर्थो विभागः समाप्तः ॥

कार्तिककृष्ण८रविवासरे संवत् ॥ १६२४ समैनाममाधसुदी १२ के-
पोथीसमापतभइवेड० ॥

Subject: Bhaktirasāmṛtasindhu, a treatise on Bhakti or devotion towards the Almighty strengthening the point by quotations from several Purāṇas like Bhāgavata in 4 Vibhāgas.

Remarks:—The Ms. is in good condition.

This is a very famous work of Caitanya school. Viśvanātha Cakravarti a voluminous author of the Caitanya school has written an epitome of this work which is published along with some other works under the name Bhaktirasāmṛtasindhubindu.

॥ भक्तिचन्द्रिका—समूला ॥

8129. BHAKTICANDRIKĀ—SAMŪLĀ.

Burnell's Catalogue No. 6483. Page 94. Left column.

Substance—Paper. Size—$7\frac{3}{4} \times 3\frac{3}{4}$ inches. Sheets—5.

Lines—13-16 to a Page. Script—Devanāgarī. No. of Granthas—163. Author—? Complete. Not Printed.

Beginning:

भक्तिग्रन्थं प्रतिपादयन्मङ्गलमाचरति शार्दूलवृत्तेन ।

गानैरिति ।

गानैर्नारदगोपिकादिषु निजप्रेमाणमावर्धयन्
स्वे स्वे कर्मणि योजयन् सुरमुखान् श्रद्धात्मबुद्धिप्रदः ।
नित्यं यः सनकादिकेभ्य उरुधा गीतः श्रुतौ राजते
सत्यज्ञानशिवात्मकं तमनिशं कृष्णाभिधानं नुमः ॥

वयं तं श्रुतिस्मृतिप्रसिद्धं नुमः स्तुमः ।

End:

विनेयैर्जिज्ञास्यामृतफलपरा भक्तिरखिलैः
ततस्तां मानाद्यैर्विलसदनुबन्धं प्रथमतः ।
मनोज्ञं शाण्डिल्यो मधुरतरमंगल्यवचसा
निबध्नाति स्माभूपथमदमुखेनातिविशदम् ॥

व्या ॥

तस्मात्कृतोऽपि भक्तिप्रधानोयं ग्रन्थः प्रमाणमेव मन्तव्यमिति भावः ।

Colophon:

॥ मू ॥ इति श्री भक्तिचन्द्रिकायां प्रथमोल्लासः ।

Subject: Bhakticandrika, a treatise giving prominence to devotion with a commentary.

Remarks:—The Ms is in good condition. The text in this Ms

is accompanied with a commentary

॥ भगवद्भक्तिचन्द्रिकोल्लासः ॥

8230. BHAGAVADBHAKTICANDRIKOLLĀSAḤ.

P, A. Collection No. 377.

Substance—Paper. Size—$10\frac{1}{2}\times5$ inches. Sheets—53-73 (Sheet No. 57-58 missing). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—? Incomplete. Not Printed.

Beginning:

......॥ अधिक्षेपाद्यथा ॥

किमिति कुत्सितवेषविभूषणा
किमु जहासि न जातिसुशीलताम् ।
हरिरधिक्षिपति स्म सुशीलतां
समभवद्गलितश्रुरियं(?) रुषा ॥ २३ ॥

॥ यथा वा ॥

कृष्णासम्मतवाक्यशेषमखिलं श्रुत्वा तु पौत्रः शिनेः
एतत्किं कथितं त्वया हलधरेणेत्येष चिक्षेपतम् ।
सक्रोधादरुणाब्जदृग्वलयितः भ्रूभिन्नशुभ्रामतो
नो चेत्किंचन मन्त्रव...हरेर्गौरवात् ॥ २४ ॥

End:

शास्त्रार्थवित्त्वं यदि चेशभक्ति
स्वपक्षपातप्रतिबध्यमेव ।

स तामसः...प्राकृतेषु
भक्तोऽप्ययं प्राकृत एव चोक्तः ॥ ५३ ॥

यथा—

कर्णाभ्यर्णं मास्त(मास्तु) मे नाम विष्णोः
घण्टाकर्णः प्राग्वदन् सार्थसंज्ञः ।
शंभोर्लब्ध्वा विष्णुभक्तिं कृतार्थः
सम्भूतोऽयं सेश्वरानुग्रहेण ॥ ५४ ॥

Colophon:

इति भगवद्भक्तिचन्द्रिकोल्लासे तामसभक्तभेदस्त्रयोदशोल्लासः ।

Subject: Bhagavadbhakticandrikollāsa, a treatise giving different phases of devotion with examples. This work has been classified into 13 Ullāsās as bhakti etc. each ullāsā dealing with one phase of Bhakti.

Remarks:—The Ms. is in a fairly good condition wanting the beginning portion up to 52 Ślokas. It contains three Ullāsas only.

॥ भक्तिरत्नावली ॥

8231. BHAKTIRATNĀVALĪ.

Burnell's Catalogue No. 6409. Page 95. Right column. **Substance**—Paper. Size—12×5¼ **inches.** Sheets—25. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas —350. Author—? Incomplete. Printed.

Beginning:

श्री लक्ष्मीनृसिंहाय नमः ।

ये मुक्तावपि निःस्पृहाः प्रतिपदं प्रोन्मीलदानन्ददां
यामास्थाय समस्तमस्तकमणिं कुर्वन्ति यं स्वे वशे ।
तान् भक्तानपि तां च भक्तिममितं भक्तिप्रियं श्रीहरिं
वन्दे संततमर्थयेऽनुदिवसं नित्यं शरण्यं भजे ॥ १ ॥

End:

वदनं निरूप्यते । अक्रूरः ।
ममाद्यामंगलं नष्टं फलं वांश्चैव मे भवः ।
यल्लभ्यते भगवतो योगिध्येयांघ्रिपङ्कजम् ॥
तत्तेऽनुकम्पा .... ।

Colophon: (51. 23)

इति रत्नावल्यां अर्चनमष्टमविरचनम् ।

Subject: Bhaktiratnâvalî, a treatise dealing with the Bhaktiyoga text only.

Remarks:—The Ms. is in a decaying condition and wants end.

The author of this work is not known. But it is a famous work of the Caitanya school which is translated into many Indian vernaculars. Viṣṇupūri has written a commentary to this work which is also translated and published along with the text at Allahabad in Sacred Books of the Hindus series.

॥ भक्तिरत्नावलीटीका—सुकान्तिमाला ॥

8232. BHAKTIRATNĀVALĪṬĪKĀ—SUKĀNTIMĀLĀ.

Burnell's Catalogue No. 6405. Page 95. Right column.

Substance—Paper. Size—9¾ × 4¼ inches. Sheets—74. Lines—9-12 to a Page. Script—Devanāgarī. No. of

Granthas—2000. Author—Viṣṇupūrī. Complete. Printed.

Beginning:

श्री वेदव्यासाय नमः ।

सत्सदाचारानुमितश्रुतिबोधितं प्रारीप्सितनिर्विघ्नपरिसमाप्तिकारणं श्रीकृष्णकीर्तनरूपं मंगलमाचरति श्रीभागवतपद्येनैव ।

End:

वाराणस्यां महेशस्य सान्निध्ये गुरुमन्दिरे ।
भक्तिरत्नावली सिद्धा सहिता कान्तिमालया ॥ ६ ॥

Colophon:

इति श्रीभगवद्भक्तिरत्नावलीटीका सुकान्तिमाला समाप्ता ॥

Subject: Bhaktiratnāvalīṭīkā, otherwise known as Sukāntimālā.

Remarks:—The Ms. is in good condition This commentary is known also as Kāntimālā and is printed along with the text at Allahabad in the Sacred Books of the Hindus series.

॥ भक्तिरत्नावलीटीका—सुकान्तिमाला ॥

8233. BHAKTIRATNĀVALĪṬĪKĀ—SUKĀNTIMĀLĀ.

Burnell's Catalogue No. 6404. Page 95. Right column. Substance—Paper. Size—$11\frac{1}{4} \times 4$ inches. Sheets—78 1st missing. Lines—8-11 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Viṣṇupūrī. Incomplete. Printed.

Beginning:

विलासवैदग्ध्यलावण्यादिनिरपेक्षं प्रेमाधीनत्वमाद —
व्रजेति

Same as No. 8232.

End, colophon and subject—Same as No. 8232.

Remarks:—The Ms. is good condition and wants the first page.

॥ भगवद्भक्तिनिर्णयः ॥

8234. BHAGAVADBHAKTINIRNAYAH.

S. S. Collection No. 42.

Substance—Paper. Size—10 × 4½ inches. Sheets—24-40. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—275. Author—Anantadevaḥ. Incomplete. Not Printed.

Beginning:

....सु तत्तेदभिनिवेशपूर्विकासु(?) न दोषः। परमेश्वरगु-
णानुवादे तु परमेश्वरस्मारके भाषाकृते दोष इति वदतां
परमेश्वरानुराग एवावशिष्यते ।

End:

स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः ।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥
सर्वेषामप्यघवतामिदमेव सुनिष्पदनम् ।
नामव्याहरणं विष्णोर्यच्चतद्विषया मतिः ॥

इति ॥ ब्राह्मणक्षत्रियवैश्याः स्त्रियः शूद्रान्त्यजातयः... ।

Colophon: (See sheet No. 27.)

इति श्रीमदापदेवसूनुनाऽनन्तदेवेन कृते भगवद्भक्तिनिर्णये हरिभ-
क्तिकर्तव्यनिरूपणं नाम प्रथमं प्रकरणम् ॥

Subject: Bhagavadbhaktinirṇayaḥ.

Remarks:—The Ms. is in a fairly good condition. It has no beginning or end.

This author is the father of the famous Apadeva author of Mīmāmsā Nyāyaprakāśā noticed under No. 6959 (Vol. XII). He is also the author of another Vedanta work Tattvaprakriyā No. 7547 (Vol. XIII). This author belongs to a family of scholars. For more details refer to Preface to detailed contents of Vol. XII.

॥ भगवन्नामकौमुदी ॥

8235. BHAGAVANNĀMAKAUMUDĪ.

Burnell's Catalogue No. 6397. Page 98. Left column. Substance—Paper. Size—9⅜ × 5⅞ inches. Sheets—76. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1125. Author—Lakṣmīdharaḥ. Complete. Not Printed.

Beginning:

अंहः संहरदखिलं सकृदुदयादेव जीवलोकस्य ।
तरणिरिव तिमिरजालं जयति जगन्मंगलं हरेर्नाम ॥ १ ॥

कारुण्यामृतनिर्झरः सुरसरिज्जन्माकरं श्रीवधू-
लीलाब्जं व्रजकामिनीकुचतटीकस्तूरिकामार्जकः ।

उत्तंसः श्रुतियोषितां मुनिमनोवश्यौषधिः पल्लवो
यस्याङ्घ्रिः सुरवल्लभः स जयति श्रीपुण्डरीकप्रियः ॥ २ ॥

कररुहकुलिशैर्द्विषतां
चरणाम्बुजनखरकान्तिभिर्भजताम् ।
हृदयग्रन्थिं भिन्दन्
मनसि नृसिंहः समुल्लसतु ॥ ३ ॥

* *

श्रीमद्भगवन्नामकौमुदी ॥

अत्र भगवन्नाममाहात्म्यप्रतिपादकानि पुराणवचनान्युदाहृत्य विचार्यन्ते । किमेतान्यविवक्षितस्वार्थान्युत स्वार्थपराणीति ॥

End:

नाथाय किञ्चिदपनीय न किंचिदत्र
स्वात्मैव येन सुखसिन्धुरगाधबोधः ।
आविष्कृतः करुणया करवै किमस्य
तन्नाम्नि मग्नमिदमेव मनोऽस्तु पूजा ॥

झटिति जगतामंहःस्तूलीं दहन् दहनो महान्
दहरकुहरध्वान्ते ध्वंसं नयन्नभसो मणिः ।
किरणलहरी चान्द्री चेतश्चकोरचमत्कृति-
र्भवतु भवतां नाम ज्योतिः मुदे मदनद्रुहः ॥
येन भागवतव्याख्या कृतामृततरंगिणी ।
अद्वैतमकरन्दश्च सोऽकरोन्नामकौमुदीम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमदनन्तानन्दरघुनाथपादपद्मोपजीविनः श्रीमन्नृसिंहसूनोः लक्ष्मीधरस्य कृतौ श्रीभगवन्नामकौमुद्यां नामकीर्तनस्य केवलस्यैव पुरुषार्थसाधनत्वप्रतिपादनं नाम तृतीयः परिच्छेदः।

विरोधिकृन्माघशुक्लषष्ठीभार्गववासरे।
तुलजोर्वीन्द्रकृपया लिखिता नामकौमुदी ॥

Subject: Bhagavannāmakaumudī a treatise establishing the superiority of repetition of the names of God Viṣṇu and proving that the mere recitation can open the door for salvation.

Remarks:—This Ms. is in good condition. According to Dr. Burnell it is a work that goes into Viśiṣṭādvaita system but it is not so is testified by the author himself, who in the last verse says मदनद्रुहः which is a term qualifying Śiva and not found in the works of that school. This work has been divided into 3 paricchedas the names of which are given below.

(1) पुराणवचनानां विवक्षितार्थत्वप्रतिपादनं नाम प्रथमः

(2) स्वप्राधान्येन पुरुषार्थप्रतिपादकत्वं नाम द्वितीयः

and the third is given in the colophon.

This author is the same as the famous author of the Prakrit grammar Ṣaḍbhāṣācandrika and Vedāntic works like Advaitamakaranda. He is a Telugu Brahman who became a Sanyāsin in the late stage of his life. For other details see remarks under No. 4269 (Vol. VIII) and 6930 (Vol. XII).

॥ प्रेमरसायनम् ॥

8236. PREMARASĀYANAM.

P. A. Collection No. 108.

Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—50. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Viśvanāthapaṇḍita. Complete. Not Printed.

Beginning:

इह कश्चिद्ग्रन्थारम्भे प्रेमनिरूपयितुं प्रेमातिशयाभिव्यंजकधर्मेण श्रीकृष्णं निर्दिशति । कीर्तीति ।

कीर्तिप्रतापविधुभानुसमुज्ज्वलानि
धीरैः कृतानि वदनानि दिशां प्रयस्य ।
सुव्यक्तगोपवनितानथनांतपात-
पात्रैकरूपतिमिराणि मया नुतानि ॥ १ ॥

अत्र व्याजस्तुतिरलंकारः । यद्यपि नायं कविमदोत्कर्षमावेदयन् ग्रन्थारम्भे निबद्धुमर्हः तथाप्येतदुपस्कार्यस्य श्रीकृष्णैकतानतारूपस्य प्रकृतग्रन्थप्रतिपाद्यप्रेमनिरूपणोपयोगित्वात् सोऽर्हएव निबद्धुम् । इदानीं भंग्यन्तरेण प्रकृतग्रन्थप्रतिपाद्यं दर्शयति । उच्छलदिति ।

End:

भक्तिरत्नाकरग्रन्थवर्णितं परिभाषिकम् ।
श्रवणादिवदप्यस्तु कलप्रेम्णि फलात्मकम् ॥ २१० ॥

* *

आपातरमणीयेऽपि गलितस्य पदं गतः ।
यः पुमर्थाय भवति प्रेम्णे तस्मै नमो नमः ॥ २१२ ॥

अत्रापि नाशवलोपायौ किं वाच्यमिति सूचितमिति संक्षेपः ।

चिरन्तनग्रन्थसमुद्धृतोऽसौ
स्वल्पोऽपि सद्भावनकल्पवल्लिः ।
नानामतव्याकृतिकृन्निबन्धो
निर्दम्भ विद्वन्मुदमातनोतु ॥ १ ॥

यदुक्तं बहुभिः ग्रन्थैः सूत्रतंत्रामृतादिभिः ।
तदेवानूदितं किंचिन्न मया स्वयमूहितम् ॥ २ ॥

स्खलनं यत्र शक्तानामपि सुस्नेहपिच्छिले ।
पथि तत्र ममाशक्तवतंसस्येह का कथा ॥ ३ ॥

चित्तवत्सेन संयोज्य दोग्धा यदि मिलिष्यति ।
तर्हि गौरच्युतप्रेमदुग्धमेषा प्रदास्यति ॥ ४ ॥

Colophon:

इति विश्वनाथपण्डितविरचितं तन्त्रामृतमतानुयायि प्रेमरसायनं नाम प्रकरणं समाप्तम् ॥

Subject: Premarasāyana.

Remarks:—The Ms is in good condition. This is a work of the Caitanya school inculcating Bhakti. The author does not say anything more about himself than giving his name. But there is a great writer of Caitanya school whose name

is given as Viśvanātha Cakravarti and who is the author of many works on Bhakti one of which is Prema Sampuṭa. It is believed that this is the same author.

॥ विष्णुभक्तिचन्द्रोदयः ॥

8237. VIṢṆUBHAKTICANDRODAYAḤ.

Burnell's Catalogue No. 6116. Page 109. Right column.

Substance—Paper. Size—$10\frac{7}{8}\times4\frac{1}{2}$ inches. Sheets—110. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2860. Author—Nṛsiṁhāraṇya. Complete. Not Printed.

Beginning:

श्री महागणपतये नमः । श्रीशारदायै नमः ।

श्री नृसिंहं जगन्नाथं सच्चिदानन्दविग्रहम् ।
सर्वान्तर्यामिनं सर्वसाक्षिणं प्रणमाम्यहम् ॥

वेदव्यासं प्रणम्याथ नारदादींस्तथा गुरून् ।
निम्बादित्यान् महासिद्धान् श्रीविष्णुस्वामिनः प्रभून् ॥
ग्रन्थानालोक्य तद्भक्तैः कृतान् सर्वसुखाप्तये ।
अनेनैव कृतार्थः स्यामिति तद्भक्तियन्त्रितः ।
श्रीविष्णुप्रीतये कुर्वे विष्णुभक्तिविधूदयम् ॥
केचिन्नवरसे सक्ताः केचित्तन्नाम्नि केवले ।
अहं तत्पन्नखे चन्द्रे सुखी मुक्तो न संशयः ॥

आविर्बभूव लोकेऽस्मिन् सद्भक्ताह्लाददायकः ।

श्रीविष्णुभक्तिचन्द्रो विष्णुप्रेमर्द्धिवर्धनः ॥

End :

गङ्गागयापुष्करनैमिशानि

काशीप्रयागौ कुरुजाङ्गलानि ।

तिष्ठन्ति देवाः क्रतवश्च देहे

गोविन्दभक्तिं वहतां नराणाम् ॥

एवमाराधयेद्विद्वान् भगवन्तं श्रिया सह ।

कृतकृत्यो भवेन्नित्यं विश्वस्योद्धरणे प्रभुः ॥

विष्णुभक्तिचन्द्रोदयः षोडशैव कलायुतः ।

सेव्यतां सेव्यतां शश्वत् भगवद्भक्तिवर्धनः ॥

Colophon :

नृसिंहारण्यविख्यातो विष्णुभक्तिप्रकाशकः ।

विचार्य विष्णुशास्त्राणि चक्रे ग्रन्थं सुनिर्मलम् ॥

इति श्रीमद्विष्णुभक्तिचन्द्रोदये षोडशकलाप्रकरणं संपूर्णम् ।

श्री नृसिंहार्पणमस्तु ॥

Subject : Viṣṇubhakticandrodaya 1-16 Kalas or Prakaraṇas.

Remarks : —The Ms. is in good condition. The author refers to Nimbarka and others but does not give any details about himself.

———

॥ विद्वन्मण्डनम् ॥

8238. VIDVANMAṆḌANAM.

J. L. Collection No. 1002.

Substance—Paper. Size—10×4½ inches. Sheets—56. Lines—12-14 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Viṭṭhala. Incomplete. Printed.

Beginning:

श्री गोपीजनवल्लभाय नमः ॥

निजमुरलिकानादाह्वानागतव्रजसुन्दरी-

निरुपमनवस्नेहाम्भोधेर्विचित्रतरोर्मिभिः ।

किमपि परितश्चाश्रार्द्रोऽस्तु स्वयम्प्रकटीभवन्

प्रतियुवतिसम्भेदेनास्मादृशां विषयस्सदा ॥ १ ॥

* *

श्रुतिसूत्रादिमणिभिर्घटितं युक्तिमौक्तिकैः ।

ग्रथितं कुरुते विद्वन्मण्डनं विट्ठलस्सुधीः ॥ ३ ॥

End:

पुनरपि नमामि गोपी-

पतिरतिमार्गप्रवर्तनाचार्यम् ।

श्रीवल्लभाभिधानान्

पितृचरणान्वाङ्मनःकायैः ॥

Colophon:

इति श्रीमन्निखिलकटाक्षपाततरणिविघटितमायावादिप्रभृतिप्रतिवादि-

तमःपुञ्जविकासितश्रीगोकुलाधीशरतिसराविजश्रीवल्लभदीक्षितात्म-

जश्रीगोकुलनाथचरणैकतानश्रीविठ्ठलविरचितं विद्वन्मण्डनं संपूर्णम् ।

एतेनास्मत्कुलपतिः श्रीगोपीजनवल्लभः ।
प्रीतोस्त्वस्मासु तेनैव पूर्णता किमिहापरैः ॥

[सं १७१५]वर्षे आषाढवदि (संवत्) १७१५ शके १५८० प्रवर्तमाने चैत्रवदि ९ दिने गुरूवासरे लिखितमिदं सूर्यपुरे राजर्षिरावलेन ।

Subject: Vidvanmaṇḍanam a treatise on the theology of the cult of Krishna as the Supreme Being.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—

'भास्कररायाणामिदम् ।'

This Ms. is dated 1715 Samvat, or 1580, Śaka, or A. D. 1658.

This author is called by three names Viṭṭhala, Viṭṭhala Dīkṣita and Viṭṭhaleśvara and is popularly known by the name Gosainji in Northern India. He is the son of the great Vallabhācārya the author of Aṇubhāṣya on the Brahmasūtras and commented on some of his father's works. This work is printed in Benāres Sanskṛt Series with the commentary called Suvarṇa Sūtra by Gosvāmi Puruṣottamji Mahārāj and even there is incomplete.

॥ अवैदिकदर्शनम् ॥

AVAIDIKADARŚANAM.

॥ प्रमाणनयतत्त्वालोकालङ्कारः—सव्याख्यः ॥

8239. PRAMĀṆANAYATATTVĀ-LOKĀLANKĀRAḤ—SAVYĀKHYAḤ.

J. L. Collection 1003 a.

Substance—Paper. Size—8¼ × 3½ inches. Sheets—105. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—5000. Author—Devasūri and Ratnaprabhācārya. Complete. Printed.

Beginning:

ओं नमो अलिहन्ताणं ॥

सिद्धये वर्धमानस्स्याचाम्रा यत्नखमण्डली ।
प्रत्यूहशलभप्लोषे दीप्रदीपाङ्कुरायते ॥ १ ॥

यैरत्र स्वप्रभया दिगम्बरस्यार्पिता पराभूतिः ।
प्रत्यक्षं विबुधानां जयन्तु ते देवसूरयो नव्याः ॥ २ ॥

स्याद्वादमुद्रामयनिद्रभक्त्या ।
क्षमाभृतां नौमि जिनेश्वराणाम् ।
सन्याय्यमार्गानुगतस्य यस्यां
सा श्रीस्तदन्यस्य पुनः सदण्डः ॥ ३ ॥

इह हि लक्ष्यमाणाऽक्षोदीयोऽर्थाऽक्षूणाऽक्षरक्षीरनिरन्तरे





अस्मद्गुरुश्रीदेवसूरिभिर्विरचिते स्याद्वादरत्नाकरे न

खलु कतिपयतर्कभाषातीर्थमजानन्तोऽपाठीना अधीवराश्च प्रवेष्टुं प्रभविष्णव इत्यतस्तेषां अवतारदर्शनं कर्तुमनुरूपं तच्च संक्षेपतः शास्त्रशरीरपरामर्शमन्तरेण नोपपद्यते। सोऽपि समासतस्सूत्राभिधेयावधारणं विनेति, प्रमाणनयतत्त्वालोकाख्यतत्सूत्रार्थमात्रप्रकाशनपरा रत्नाकरावतारिका नाम्नी लघीयसी टीका प्रकटीक्रियते।

End:

एकः स्वात्मनि तत्त्वनिर्णिनीषुः परश्च परत्र द्वौ वा परस्परमित्येवं द्वावपि यदा तत्त्वनिर्णिनीषू भवतः तदा यावत् तत्त्वनिर्णयो भवति तावत्ताभ्यां स्फूर्तौ सत्यं वक्तव्यं। अनिर्णये वा यावत् स्फुरति तावद्वक्तव्यं एवं च स्थितमेतत् ॥

स्वं स्वं दर्शनमाश्रित्य सम्यक्साधनदूषणैः।
जिगीषोर्निर्णिनीषोर्वा वाद एकः कथा भवेत् ॥ १ ॥

भङ्गकथात्रयस्यात्र निग्रहस्थाननिर्णयः।
श्रीमद्रत्नाकरग्रन्थात्...धनैनवधार्यताम् ॥ २ ॥

यतः ॥

प्रमेयरत्नकोटीभिः पूर्णो रत्नाकरो महान्।
तत्रावतारमात्रेण वृत्तेरस्याः कृतार्थता ॥ ३ ॥

प्रमाणे च प्रमेये च बालानां बुद्धिसिद्धये।
किञ्चि...न चातुर्यचापलायेयमादधे ॥ ४ ॥

न्यायमार्गादतिक्रान्तं किञ्चिदत्र मतिभ्रमात् ।
यदुक्तं तार्किकैः सो(शो)ध्यं तत्कुर्वाणैः कृपां मयि ॥ ५ ॥

आशावासः समयसमिधां सञ्चयैश्चीयमाने
स्त्रीनिर्वाणोचितशुचिवचश्चातुरीचित्रभानौ ।
प्राजापत्यं प्रथयति तथा सिद्धराजे जयश्री-
र्यस्योद्वाहं व्यधित स सदानन्दताद्देवसूरिः ॥ ६ ॥

प्रज्ञानं यदवेदिभिः स्फुरद्दशा सम्भावितस्तार्किकैः
कुर्वाणः प्रमदान्महाकविकथां सिद्धान्तमार्गाध्वगः ।
दुर्वादिाङ्कुशदेवसूरिचरणाम्भोजद्वयी षट्पदः
श्रीरत्नप्रभसूरिरल्पतरधीरेतां व्यधाद्वृत्तिकाम् ॥ ८ ॥

वृत्तिः पञ्चसहस्राणि येनेयं परिपठ्यते ।
भारतीभारती चास्य प्रसर्पन्ति प्रजल्पतः ॥

Colophon:

इति प्रमाणनयतत्त्वालोकालङ्कारे श्रीरत्नप्रभाचार्यविरचितायां रत्नाकरावतारिकाख्यलघुटीकायां वादस्वरूपनिर्णयो नामाष्टमः परिच्छेदः । तत्समाप्तौ च समाप्तश्चायं रत्नाकरावतारिकाख्यलघुटीकेति ॥ ग्रं० सहस्र ५००२ लिखिता ॥ शुभं भवतु ॥

Subject : Pramāṇanayatattvālokālaṅkāra with commentary.

Chapter	4	आगमस्वरूपनिर्णयः ।	P. 61
,,	5	प्रमेय ,, ,,	,, 67
,,	6	फलप्रमाणस्वरूपाद्याभासनिर्णयः ।	,, 79
,,	7	नयात्मस्वरूपनिर्णयः ।	,, 97
,,	8	वाद ,, ,,	,, 105

Remarks:—The Ms. is in a good condition. On the title page is given—

'प्रमाणनयतत्वालोकालङ्कारो गाम्भीरेः'

On the last sheet is given—

'स्याद्वादरत्नाकरावतारिकापुस्तकं भास्कराग्निचिताम् ॥'

Ratnaprabhācārya, the author of this work, a regular treatise on Jainism is the pupil of Devasūri, the author of Syādvāda Ratnākara. This work of Ratnaprabhācārya is called Laghuṭīka, Pramāṇanayatattvālokālaṅkāra, and Ratnākarāvatārikā. It is a commentary on the big work of the author's teacher. It gives a survey of the whole field of Jain logic and serves as a Vṛtti on the original Sūtras of the Jain School also.

The work has been published as No. 1 in the Jaina-Yaśo-Vijaya-Granthamālā, Benares.

॥ भक्तामरस्तोत्रव्याख्या—समूला ॥

8240. BHAKTĀMARASTOTRAVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 6337 Page 92. Left column.

Substance—Paper. Size—9¾ × 4 inches. Sheets—39 (1-39). Lines—9-11 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Mānatuṅgācārya. Complete. Printed.

Beginning:

भक्तामरप्रणतमौलिमणिप्रभाणा-

मुद्योतकं दलितपापतमोवितानं ।

सम्यक्प्रणम्य जिनपादयुगं युगादा-

वालंबनं भवजले पततां जनानाम् ॥ १ ॥

अस्यार्थः ॥ भक्त्या समाराधयतीति भक्तः । अमराः विबुधाः ज्ञानिनः सूक्ष्मासूक्ष्मविचारको विद्वानित्यमरः । प्रणतमौलिमणिः किं मूलाधारात्सहस्रारोपरि परमपदं जिनपदप्रणमितम् ।

* *

यस्संस्तुतस्सकलवाङ्मयतत्त्वबोधादु-

द्भूतबुद्धिपटुभिस्सुरलोकनाथैः ।

स्तोत्रैर्जगत्रितयचित्रहरैरुदारैः-

स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ २ ॥

End:

स्तोत्रस्रजं तव जिनेन्द्रगुणैर्निबद्धां

भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् ।

धत्ते जनो य इह कण्ठगतामजस्रं

तं मानतुङ्गमिव स्रासमुपैति लक्ष्मीः ॥ ४४ ॥

*

एतत्स्तोत्रं मानतुङ्गाचार्यैः कृतं ।

श्री शंकराद्यसुधानिधिसंभवाय
श्रीमद्गुरुस्सुमहिमाखिलपूजिताय ।
सौभाग्यशीतल सदा सुखदायकाय
र(अ)भ्यर्च्चावन्दित मुकुन्द सुगन्धपुष्पैः ॥ ४५ ॥

कल्याणकौशलकलाकलितैः सुशीलैः
कारुण्यपूरितसुधानिधितेऽङ्घ्रिपद्मैः ।
अज्ञाननाशनविचित मनोऽभिलाषैः
कल्यणसारानिगमार्थविलासितार्थै(ः) ॥ ४६ ॥

Colophon:

इति श्रीमानतुङ्गविरचितायां अरूपरूपितब्रह्मवर्णनं नाम महाज्ञानप्रकाशकं नाम भ्रमरस्तोत्रं सम्पूर्ण । संवत् १७७६ । आश्वयुजबहुलनवमीदिवसे कर्कटपुरे केरलदेशपश्चिमसमुद्रतीरे मुकुन्देन लिखितम् ॥

Subject: Bhaktāmarastotravyākhyā, with text 1-46 Slokas.

Remarks:—The Ms. is in good condition. The other work contained herein is Sugnāna Vimśati. The Ms. has been copied here. The Ms. is dated 1719 A. D.

This is a great work on Jaina theology which is very widely read. It is translated into many Indian vernaculars. It has attained such popularity that its each line is taken as the last line, and stotras composed by authors like Ratna-

candra and Ratnasimha. It is otherwise called Ādināthastotra.

It has been published in the Kāvyamālā Series; Gucchaka VII. Stotra I.

॥ भक्तामरस्तोत्रव्याख्या—समूला ॥

8241. BHAKTĀMARASTOTRAVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 6429. Page 91. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4$ inches. Sheets—6. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—92. Author—Mānatungācārya. Incomplete Printed.

Beginning—Same as No. 8240.

End:

सोऽहं तथापि तव भक्तिवशान्मुनीश

कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः ।

प्रीत्याऽत्मवीर्यमविचार्य मृगो मृगेन्द्रं

नाभ्येति किं निजशिशोः परिपालनार्थं ॥ ५ ॥

तव शिवतत्त्वोद्भवं ज्ञानं भक्तिः किं भक्तिप्रेम्णा प्रीतिषु ध्यानं भक्त्या ध्यानं ज्ञानवैराग्यभक्त्या भवीत तत्क्षणात् वात्सल्यमोहाद्भवतीह क्षणात् वीतरागध्यानात्

वीतरागा भवतीति सिद्धं कीटिकाभ्रमरी....... ॥

Subject: Bhaktāmarastotravyākhyā 1-5 ślokas.

Remarks:— The Ms. is in good condition. The name given on the title page is Vākyasudhā.

॥ विवेकाविलासः ॥

8242. VIVEKAVILĀSAḤ.

J. L. Collection No. 1003 b.

Substance—Paper. Size—8¼ × 8¼ inches. Sheets—25. Lines—17 to a Page. Script—Devanāgarī. No. of Granthas—1390. Author—Jinadattasūri. Complete. Printed.

Beginning:

शाश्वतानन्दरूपाय तमा···मेक....ते ।
सर्वज्ञाय नमस्तस्मै कस्मैचित्परमात्मने ॥ १ ॥

···मंखयम्भुवं बुद्धं नरकान्तकरं गुरुम् ।
भास्वन्तं शङ्करं श्रीदं प्राणोमिंप्रयतो जिनम् ॥ २ ॥

जीववत्प्रतिभा यस्य वाचामधुरिमाश्रितम् ।
गेहं श्रियस्कं स्व································गुरुम् ॥ ३ ॥

* *

स्वस्यान्यस्यापि पुण्याय कुप्रवृत्तिनिवृत्तये ।
श्रीविवेकाविलासाख्यो ग्रन्थः प्रारभ्यते मितः ॥ ९ ॥

* *

आलोक इव सूर्यस्य सुजनस्योपकारवत् ।

ग्रन्थोऽयं सर्वसामान्यो मान्यो भवतु धीमताम् ॥ १२ ॥

धर्मार्थकाममोक्षाणां सिद्धयै ध्यात्वेष्टदेवताम् ।

भागेऽष्टमे त्रियामाया उत्तिष्ठेदुद्यतः पुमान् ॥ १३ ॥

End :

स श्रेष्ठः पुरुषाग्रणीः स सुभटोत्तंसः प्रशंसास्पदं

स प्राज्ञस्स कलानिधिः स च मुनिः स क्ष्मातले योगवित् ।

स ज्ञानी स गुणिव्रजस्य तिलको जानाति यस्स्वां मृतिं

निर्मोहः समुपार्जयत्यथपदं लोकोत्तरं शाश्वतम् ॥ १२ ॥

(इति श्रीजिनदत्तसूरिविरचितश्रीविवेकविलासे द्वादशोल्लासे जन्मचर्यायां परमपदप्रणामो नाम द्वादश उल्लासः ॥)

अस्ति प्रीतिपदं गल्लो जगतः सहकारवत् ।

मुनि पुंस्कोकिला....वा यतस्थानक...तिः ॥ १ ॥

अर्हन्मतपुरीवप्रस्तत्र श्रीराशिलप्रभुः ।

अनुल्लङ्घ्य पदोर्वादिवीरैस्स्थैर्यगुणैकभूः ॥ २ ॥

गुणाः श्री जीवदेवस्य प्रभोरद्भुतकेलयः ।

विद्वज्जनशिरोदोलां यन्नोज्झन्ति कदाचन ॥ ३ ॥

अस्ति तच्चरणोपास्तिसञ्जातस्वास्तिविस्तरः ।

सूरिः श्री जिनदत्ताख्यः ख्यातस्सकलसूरिषु ॥ ४ ॥

.... संवर्धनविधौ विधुः ।

श्रीमानुदयासिह्मोऽस्ति श्री जाबालिपुराधिपः ॥ ५ ॥

तस्य विश्वाससदनं कोशरक्षाविचक्षणः ।

देवपालो महामात्यः प्रजानन्दनचन्दनः ॥ ६ ॥

आधारस्सर्वधर्माणामवधिर्दानशालिनाम् ।

आस्थानं सर्वपुण्यानामाकारस्संपदां पदम् ॥ ७ ॥

प्रतिपन्नात्मजस्तस्यां वायटान्वयसम्भवः ।

धनपालश्शुचिर्धीमान् विवेकोल्लासिमानसः ॥ ८ ॥

यन्मनस्तोषपोषाय श्री जिनदत्तसूरिभिः ।

श्री विवेकविलासाख्यो ग्रन्थोऽयं निर्ममेऽनघः ॥ ९ ॥

देवश्श्रीधरणो भुजङ्गमगुरुर्यावद्युगादिप्रभोः

श्रीपादद्विश्चवदः स्फुरद्वरकलालङ्कारभृङ्गारिणः ।

भक्तिव्यक्तिविशेषमेष कुरुते तावच्चिरं नन्दना-

द्ग्रन्थोऽयं भृशमश्लथादरपरैरभ्यस्यमाना बुधैः ॥ १० ॥

Colophon:

इति श्रीजिनदत्तसूरिविरचिते द्वादशोल्लासे विवेकविलासग्रन्थस्य प्र-

शस्तिः ॥ सम्पूर्णोयं विवेकविलासग्रन्थः । समाप्तः ॥

ग्रन्थाग्रसर्वसंख्या ॥ १३९० ॥ शुभं भवतु कल्याणमस्तु ॥

Subject: Vivekavilāsā 1—12 Ullāsas.

Remarks—The Ms. is in a fairly good condition.

This Ms. is written in the northern Devanāgarī Script. On the last sheet is given—

' रङ्गभट्टभट्टगोस्वामिनामिदम् ।

The author of this work is Jinadattasūri, pupil (or protige ?) of Rāśilaprabhu. He wrote this work to please Dhanapāla, son of the minister of Udayasimha, King of Jābālipura (Jubbalpur).

This work is somthing like a Smṛti, a Code, secular as well as religious and philosophical. The first part called Dinacaryā relates to the every-day life from the time of waking up and the latter half, Janmacaryā, deals with Jain philosophy after briefly describing 5 other systems. It thus formulates six systems-Jaina, Mīmāmsaka, Bauddha, Sāṅkhya, Śaiva and Nāstika. The Mīmāmsaka comprises of the Pūrva (Karma) and the Uttara (Brahma) Mīmāmsas. It is interesting to note that the author describes the Nyāya and Vaiśeṣika systems as the sects of the Śaiva School. The Vaiśeṣika is described by the author as having only 6 padārthas. Under the last, the Nāstika, the author rightly brings the only one Materialistic School of India, the Carvākas, their Nāstikya consisting of their views that the Penta-elemental physical frame is the soul and that there is no future life after death.

The author is the teacher of Amaracandra, author of the Kāvya, Bālabhārata. His date is A. D. 1200.

The work has been published as No. 1, in the Sarasvatī Granthamālā, Agra, with a Hindi Translation.

॥ स्याद्वादमञ्जरी ॥

8243. SYĀDVĀDAMAÑJARĪ.

J. L. Collection No. 1004

Substance—Paper. Size—10 × 5¼ inches. Sheets—53. Lines—17 to a Page. Script—Devanāgarī. No. of Granthas—3200. Author—Mallisena. Complete. Printed.

Beginning:

सकलपण्डितशिरोमणिपण्डितश्रीहर्षकुशलगुरुभ्यो नमो नमः ।

यस्य ज्ञानमनन्तवस्तुविषयं...पूज्यतादेवतो(?)

नित्यं यस्य वचो न दुर्नयकृतैः कोलाहलैर्लुप्यते ।

रागद्वेषमुखात् द्विषां च परिषत् क्षिप्ता क्षणाद्येन सा

स श्री वीराविभुः विधूतकलुषां बुद्धिं विधत्तां मम ॥

* *

मातर्भारति सन्निधेहि हृदि मे येनेयमाप्तस्तुतेः

निर्मातुं विवृतिं प्रसिध्यति जयादारंभसंभावना ।

यद्वादिस्मृतमोष्ठयोः स्फुरति यस्सारस्वतश्शाश्वतो

मन्त्रश्रीतु(रु)दयप्रभेति रचनारम्भो ममाहर्निशम् ॥ ४ ॥

इह हि * *

श्री हेमचन्द्रसूरिणा जगत्प्रसिद्धश्रीसिद्धसेनदिवा-करविरचितद्वात्रिंशद्वात्रिंशिकानुसारि श्रीवर्धमानजि-

नस्तुतिरूपमयोगव्यवछेदान्ययोगव्यवच्छेदाभिधानं द्वा-त्रिंशिकाद्वितयं विद्वज्जनमनस्तत्त्वावबोधनिबन्धनं विदधे । तत्र च प्रथमद्वात्रिंशिकायाः सुखोन्नेयत्वात् व्याख्यानमुपेक्ष्य द्वितीयस्याः तस्याः निःशेषदुर्वादिपरिषदाधिक्षेपदक्षायाः कतिपयपदार्थविवरणकरणेन स्वस्मृतिबीजप्रबोधविधिर्विधीयते । तस्याश्चेदमादिमं काव्यम्—

'अनन्तविज्ञानमतीतदोषमबाध्यसिद्धान्तममर्त्यपूज्यम् ।
श्रीवर्धमानं जिनमाप्तमुख्यं स्वयंभुवं स्तोतुमहं यतिष्ये ॥'

End:

अविसंवादिवचनः कष्टच्छेदतापलक्षणपरीक्षात्रयवि... ...फलप्राप्तौ न विसंवदतीत्येनं शीलमविसंवादि तथाभूतं वचनमुपदेशो यस्याः साऽविसंवादिवचनोऽव्यभिचारिवागित्यर्थः । यथा च पारमेश्वरीवाक् न विसंवादमासादयति । तथा तत्र स्याद्वादसाधने दर्शितो(?)कषादिस्वरूपं चेत्व(?)माचक्षते प्रावचनिकाः...... ।

पाणावहा....वण्णाणजो उपडिसेद्ध ।
काणाकयणाईणं जोयविही एम धम्मकसो ॥
वम्भाणट्ठाणेणं जेण णवाहित्थ एतयं नियमा ।
स भवइ यपरिशुद्धं सो कुणधम्मं मिवेडाक्ति ॥ २ ॥

विभ्राणोकलिभिर्जयी जिनतुलां श्रीहेमचन्द्रप्रभौ
तद्दृब्ध(?)सुनिवृत्तिनिर्मितिमिषाद्भक्तिर्मयाऽविष्कृता ।
निर्णेतुं गुणदूषणे निजगिरां तन्नाथये सज्जनान्
तस्यास्तत्त्वमकृत्रिमा बहुमतिः साऽस्त्वत्र सम्यग्यतः ॥१॥

Colophon:

इति श्री स्याद्वादमञ्जरीग्रन्थः संपूर्णः । भद्रं भवतु सकलसंघस्य ॥

Subject: Syādvādamañjarī.

Remarks—The Ms. is in a fairly good condition and is in North Indian Script. On the title page is given—

श्रीमद्गम्भीरराजभारतीदीक्षितानां ॥

Śrī Siddhasenadivākara wrote the Dvātriṁśatdvātriṁśikā upon which the famous Hemacandra embodied its principles in a stotra of his on Śrī Vardhamānajina, called Vītarāgastuti consisting of two parts, respectively named Ayogavyavaccheda and Anyayogavyavacchedadvātriṁśikās.

Mallisena wrote in 1292 Samvat or A. D. 1235, a commentary on the 2nd part of the above work, leaving the first as too easy to need a commentary and not on the whole of Hemacandra's stotra as Dr. Keith suggests.

This commentary of Mallisena is called Syādvādamañjarī, dealing about the philosophy of Jainism.

The work has been edited as No. 30, in the Jaina-yaśovijayagranthamālā, from Benares.

॥ अवैदिकदर्शनसंग्रहः ॥

8244. AVAIDIKADARŚANASAṄGRAHAḤ.

Burnell's Catalogue No. 6502. Page 123. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—15. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Gaṅgādharavājapeyayājin. Complete. Printed.

Beginning:

नत्वा विशुद्धविज्ञानं दक्षिणामूर्तिमीश्वरम् ।
अवैदिकानि तन्त्राणि संगृह्य विवृणोम्यहम् ॥

इह हि भगवता बुद्धमुनिना वैदिकमार्गविप्लावनाय चत्वारि मतानि उत्तममध्यमाधमभेदेन प्रवर्तितानि । तत्र बाह्यार्थास्तित्ववादिनो निकृष्टमतयः 'न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम्' इति नयेन सर्वास्तितां तेभ्यः प्रतिपाद्य तर्कैस्तत्रारुचिमुत्पाद्य विज्ञानमात्रास्तितामवतारिताः । ततस्तत्राप्यस्वारस्यमुत्पाद्य शून्यतायां परमतत्त्वेऽवतारिताः ।

End:

जीवश्च नाणुर्न विभुः । परस्परपक्षोक्तदूषणेनाधिक्षेपात् । किं तु शरीरपरिमाणो मनुष्यशरीरगतो जीवो मनुष्यशरीरपरिमाणो हस्तिशरीरगतो हस्तिशरीरपरिमाणो मशकशरीरगतो जीवो मशकशरीरपरिमाण इति । न चैवमवयवोपचयापचयाभ्याममनित्यत्वप्रसङ्गः । वस्त्वनेकान्त-

वादिनस्तददोषादित्यार्हतसिद्धान्तरहस्यम् ॥

Colophon:

इत्थं मतानां पञ्चानां वेदमार्गविरोधिनाम् ।

सिद्धान्तसारः संक्षिप्य दर्शितो विदुषां मुदे ॥

इति श्रीमद्गङ्गाधरवाजपेययाजिप्रणीतोऽवैदिकदर्शनसंग्रहस्समाप्तिमगात् ॥

Subject: Avaidikadarśanasaṅgraha.

Remarks:—The Ms. is in good condition. There is a transcript copy of this Ms. in this Library. After the colophon is given the following:

लिखितमेतत्काशीवासिभास्कररायेण ।

नित्यप्रोद्यतदानवारिनिकरप्रच्छन्नभास्वत्करः
क्षोणीभृन्निवहेष्ववाप नियतां यस्सार्वभौमाभिधाम् ।
स्वश्रीनिर्जितपुण्डरीककुमुदः कल्याणगीर्नन्दितः
किं मेरुः किमु दिग्गजो न हि न हि श्रीशाहपृथ्वीपतिः ॥ १ ॥

यः पूर्वं परिवर्धितः करुणया सत्वत्करप्रस्नव(?)-
दानांबुव्ययतः कृशस्समभवत्पाथोनिधिः सप्तधा ।
शक्रेणेव दितेः सुतः पुनरपि त्वं चेत्करोषि क्रुधा
कुर्यात्किं हि तदेति साश्रु विनदत्येषोऽभ्रवृन्दाधिपः ॥ २ ॥

कार्त्स्यंकरस्स च कुत्र तिष्ठति सदा चत्वार एव क तं
ब्रूते किं कमलां स सा कतिविधा प्रश्ना अमी पञ्च वै ।
एषामुत्तरमेकवर्णमपि यल्लोके प्रसिद्धं प्रभो
तस्य त्वं शतकोटिनाऽचलनिभं दारिद्र्यमाशु क्षिणु ॥ ३ ॥

आभूनस्थमुखन्यूनोगदीश सहितः पुर(?) ।
भूयादभीष्टदश्शाहक्ष्माभृद्रजमुखस्तव ॥ ४ ॥

परोपकारकल्पेऽपि न दृष्टा त्वयि शेषता ।
आधानवच्छाहभूपतन्मिथ्योवाच बादरिः ॥ ५ ॥

योगपरोऽन्तेवासी
लघुरिति धीर्यो भजेत्सदा गुरुताम् ।
त्वद्वचसा शाहविभो
पिङ्गलनागः समंगळं दधताम् ॥ ६ ॥

मल्लमुखे धुर्यमुखे
सूर्यमुखे मदनमध्ये च ।
नवनीतादौ च चरन्
पातु त्वां केशवो राजन् ॥ ७ ॥

एकः शाहमहीपतिर्नृपगणेष्वेकश्शिवो निर्जरे-
ष्वेको ज्योतिषि भास्करः कुलगिरिष्वेकस्सुवर्णाचलः ।
श्रीगङ्गाधरवाजपेयिबुधराडेको बुधानंगणे
च्छन्दश्शास्त्रविचारचारुचतुरेष्वेकः कृती भास्करः ॥ ८ ॥

कृतं भास्कररायेण पद्याष्टकमिदं शुभे ।
शाहभूमीपतेर्यस्मान्नाऽविष्णुः पृथिवीपतिः ॥ ९ ॥

On the title page is given

श्रीमच्छाहमहीशमण्डनसमाज्ञप्तैर्मुहुः सादरं
श्रीगङ्गाधरवाजपेयमखिभिः षड्दर्शिनीपारगैः ।

तेनेऽवैदिकतन्त्रसंग्रह इति ग्रन्थो(ऽ)यंए(मे)तंसतां
तुष्ट्यै भास्कररायनामकक्रुती भारत्युपास्योऽलिखत् ॥
श्रीमदुमासहायः परमेश्वरः प्रीयताम् ॥

The author of this tiny compendium of the heterodox philosophical systems is Gaṅgādharavājapeyayājin, whose descendents are still flourishing at Tiruvālaṅgāḍu. He is the same as the author of the ṭīka—Rasikarañjanī, on Śrī Appayyadīkṣita's Kuvalayānanda and of the Kāṇādasiddhantarahasya described above. According to a verse on the title page given above, we come to know that Gaṅgādharavājapeyayājin was requested by King Śāhaji (1684-1710 A. D.) to write this work. This means, our author lived towards the end of the 17th century A. D. and the beginning of the 18th. This is confirmed by the words of the author himself, in the introductory verse of his Rasikarañjanī, from which we learn that, that work also was written at the request of King Śāhaji and that Gaṅgādharavājapeyayajvan was the son of one Devasimhamakhin and pupil of Viśvarūpayati and that the great Appayyadīkṣita was the teacher of his grandfather's brother. (Vide No. 5205 Vol. IX) This work is printed and published by the Śrī Vāṇi Vilās Press, Śrīrangam.

APPENDIX A.

INDEX OF AUTHORS.

(Vol. XIV.)

NAMES.		NUMBERS.
Umāpatiśivācārya	...	8197
Keśava	...	7849-51
Kṛṣṇānandasarasvati	...	8198-200
Gaṅgādharavājapeyayājin	...	8244
Ciranjīvibhaṭṭācārya	...	8132
Janārdanabhaṭṭa	..	7903
Jayatīrtha	...	7826-38; 7861-70 7932; 7946-53 7968-73; 7983-87; 7997-8001; 8011-17 8026-35; 8044; 8055-63; 8077-82; 8111-17; 8128 & 29 8138 & 39.
Jinadattasūri	...	8242
Jyotirnātha	...	8206 & 07
Timmaṇṇācārya	...	7852; 8064; 8134 & 85; 8136 & 87
Trivikramācārya	...	8126
Devasūri	...	8239
Dharmarājaśivadīkṣita	...	8215
Narasimhayati	...	8040
Narahari	...	7918-20
Nārāyaṇa	...	8125
Nārāyaṇatīrtha	...	8226
Nārāyaṇamuni	...	7791
Nṛsiṃhāraṇya	...	8127, 8237
Pāṇḍuraṅga	...	8067
Bālakṛṣṇabhaṭṭa	...	8203
Bhojadeva	...	8180-82

———

APPENDIX B.

INDEX TO OWNERS OF MSS.

(Vol. XIV)

APPENDIX C.

INDEX TO SCRIBES OF MSS.

(Vol. XIV)

APPENDIX D.

INDEX TO DATED MSS.

(Vol. XIV.)

	Dates		Numbers.
A. D.	1603	—	7817
„	1719	—	8239
„	1762	—	7906
„	1770	—	7827

APPENDIX E.

INDEX OF WORKS NOTICED IN

Vol. XIV.

* The asterisks indicate that the work is not available in print.

NAMES.	NUMBERS.
Cidvilāsaḥ *	8178 & 79
Jagatsṛṣṭikramaḥ *	8140
Kathālakṣaṇam	7957-60
Karmanirṇayaḥ	8041-43
" Ṭīkā *	8044
" Ṭīkāvyākhyā—Karmaprakāśaḥ *	8045
Gajapañcānanaḥ *	8134 & 35
Granthamālikāstotram *	8138 & 39
Tattvatrayanirṇayavivaraṇam	8187
Tattvaprakāśikā	8180-82
" "	8193-95
" " Ṭīkā	8183-86
" Vyākhyā-Abhinavacandrikā *	7842 & 43
" " Tātparyacandrikā	7844-48
" " Bhāvabodhaḥ *	7839 & 40
" " Vivaranoddhāraḥ *	7841
Tattvaratnaprakāśikā *	8087
Tattvavivekaḥ	8008-10
" Vyākhya-Vivaraṇam *	8011-17
Tattvasaṅkhyānam	7989-96
" Vyākhā-Vivaraṇam	7997-8001
Tattvasaṅgrahaḥ *	8088 & 89
" Vyākhyā-Laghuṭīkā	8188 & 89
Tattvodyotaḥ	8018-25
" Vyākhyā	8026-35
Tarkatāṇḍavam	8090-94
" Vyākhyā-Nyāyadīpaḥ	8095-97
Tātparyacandrikāvyākhyā*	7853
" " Nyāyavivaraṇam *	7852

NAMES	NUMBERS.
Śrutaprakāśikāvyākhyā—Bhāvaprakāśikā	7784
Śikhariṇīmālāstotraṭīkā *	8176
„ Vyākhyā	8174
Śivakarṇāmṛtam	8169-73
Śivatattvaratnakalikāvyākhyā *	8198-200
Śivatattvavivekaḥ	8175
Śivayogapradīpikā *	8201 & 02
Śivādvaitanirṇayaḥ	8177
Śivotkarṣaprakāśaḥ	8203
Śaivatattvāmṛtam	8204 & 05
Śaivaratnākaraḥ	8206 & 07
Śrutisūktimālā	8208
„ Vyākhyā—Tattvaprakāśikā *	8209-14
Śrutyartharatnamāla *	8215
Sattattvaratnamālā	8131
Sanatsujātīyavyākhyā *	8133
Sarvamūlādyantaślokāḥ	8152 & 53
Sārabhogaprakāraḥ	8083
Siddhāntaratnāvalī *	7811 & 12
Sudhānādaraṇīyakhaṇḍanam	8136 & 37
Sṛṣṭivicāraḥ	8141
Stotraratnavyākhyā	7810
Syādvādamañjarī	8243



ERRATA ET ADDENDA of VOL. XIV.

Page	Line	For	Read
5945	10	Delete 'not'	
5955	5	बृत्तस्य	वृत्तस्य
5969	11	89	119 a
5974	18	Add 'Not noticed by Burnell' before 'Ms.'	
5980	15	सर्वा	सर्वं
5985	12	तद्य	तदा
,,	20	प्राक्षिद्ध	प्रासिद्ध
5989	last line	Add 98. after 'Page'	
6015	8	× ×	* *
6019	8	प्रसाध्ययमोक्षं	प्रसाध्याथ मोक्षं
6048	7	Prakāśika	Prakāśikā
6069	17	bhāṭṭa	bhaṭṭa
6144	last line	Add 'Not noticed by Burnell' before Ms.	
6147	17	भीमसेन	भीमसेनेन
6178	9	Add 'Not noticed by Burnell Ms. No. after 8030.	
6191	21	Delete 'not.'	
6204	10	Not noticed by Burnell Ms.	Burnell's Catalogue
6205	2	Burnell has omitted to notice this No. in his Catalogue.	

Page	Line	For	Read
6207	20	6052	8105
6239	6	सहस्रा	सहस्र
6241	last line	द्विताय	द्वितिय
6249	23	मथिलोकं	मधिलोकं
”	25	मारचितयेत्र	मारचित एव
6290	16	17 a	97a
6302	5	6402	8183
”	20	11411	11401
6315	8	Jyoti	Jyotis
6349	9	Add Not noticed by Burnell before 'Ms.'	
6376	22	8129	8229
6407	20	यपरि	इय परि


ज्ञानमंदिरम्
जंगमवाड़ी मठ काशी

The following publications are available for sale from the Hony. Secretary, Tanjore Mahārāja Serfoji's Sarasvatī Mahāl Library Tanjore.

1. A Descriptive Catalogue of the Sanskrit Manuscripts in the Tanjore Mahārāja Serfoji's Sarasvatī Mahāl Library, Tanjore.

Vol. I.	Vedas.	Price.	Rs. 2—0—0
Vol. II.	Vedas (Contd.)	,,	Rs. 2—0—0
Vol. III.	Vedas (Contd.) Vedāṅgas	,,	Rs 2—0—0
Vol. IV.	Vedāṅgas (Contd.) Kalpa—Śrauta.	,,	Rs. 2—0—0
Vol. V.	Do. (Concluded)	,,	Rs. 2—0—0
Vol. VI.	Kāvyas	,,	Rs. 2—0—0
Vol. VII.	Do. (Concluded)	,,	Rs. 2—0—0
Vol. VIII.	Nāṭakas		Rs. 2—0—0
Vol. IX.	Kośa, Chandas and Alaṅkāra.	,,	Rs. 2—0—0
Vol. X.	Vyākaraṇa	,,	Rs. 2—0—0
Vol. XI.	Vaiśeṣika, Nyāya, Sāṅkhya & Yoga.	,,	Rs. 2—0—0
Vol. XII.	Pūrvamīmāmsā and Uttaramīmāmsā (Advaita).	,,	Rs. 2—0—0
Vol. XIII.	Do. Do.	,,	Rs. 2—0—0
Vol. XIV.	Uttaramīmāmsā (Viśiṣṭādvaita Dvaita, Śaiva, Caitanya) & Avaidikā	,,	Rs. 2—0—0

2. A Descriptive Catalogue of Tamil Manuscripts of the above Library.

Vol. I.	Price.	Rs. 2—0—0
Vol. II.	,,	Rs. 1—0—0
Vol. III.	,,	Rs. 1—0—0

3. A Descriptive Catalogue of Marathi Manuscripts and Books of the above Library.

Vol. I Vedānta, Purāṇa and Rāmāyaṇa. Price. Re. 1—0—0

4. A Catalogue of French, Latin, Italian, and Greek Books of the above Library. Price. Re. 0—4—0
